PURANETIHASA

ACHARYA 2nd YEAR
Course/Paper.7

# PART - A

# विष्णुपुराणम् (प्रथमांशः)

# *Viṣṇupurāṇam (Prathamāṃśaḥ)*

## CENTER OF DISTANCE & ONLINE EDUCATION

*(Formerly Directorate of Distance Education)*

## NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमोऽध्याय:

## प्रस्तावना –

अष्टादशमहापुराणेषु श्रीविष्णो: स्वरूपात्मकं षट्सात्त्विकपुराणेष्वन्यतमं विष्णुपुराणं सर्वोत्कृष्टं तथा वैष्णवानां परमप्रियं तथा मोक्षदायकञ्च वर्तते। त्रयोविंशतिसहस्रात्मके पुराणेऽस्मिन् सर्वेषां तत्त्वानां तथा भगवत: श्रीविष्णो: स्वरूपं निखुणं प्रतिपाद्यते। कृत्स्नं विष्णुपुराणं षट्सु अंशेषु विभाजितं विद्यते। तत्र समेषां भूगोल-खगोल-कर्मकाण्ड-राजवंश-श्रीकृष्णचरित-श्रीविष्णुचरितञ्चेत्यादय: विषया: प्रतिपादिता: सन्ति। कलौ युगेऽस्मिन् सर्वेषां वैष्णवानां मोक्षदायकत्वेन यद्यपि श्रीमद्भागवतमहापुराणं सर्वत्र विद्योतते तथापि विष्णपुराणस्य स्थानम् अद्वितीयमन्यतमञ्च। प्रतिपाद्येऽस्मिन् विषये प्रथमांशस्य संम्पूर्णं वर्णितं विषयं पाठकानां तथा परीक्षार्थीणां सौविध्यार्थं विचिन्तयन् सप्त अध्यायेषु परिकल्प्यते।

## उद्देश्यम् –

अध्यायस्यास्य महदुद्देश्यं वर्तते। अत्र पाठका: श्रीविष्णुपुराणस्य एतान् सर्वान् विन्दून् पठिष्यन्ति।

- मैत्रेयस्य प्रश्नवर्णनम्
- भगवत: श्रीविष्णो: जगत्कारणत्त्वम्
- चतुर्विंशतितत्त्वानामुत्पत्ति: क्रमश्च
- भूतानामाविर्भाव: लयश्च
- कालनिरूपणम्

## मैत्रेयस्य जगद्विषयकप्रश्नवर्णनम्—

परमपावनिकस्य श्रीपराशरस्य शिष्याग्रगण्यः महर्षिः मैत्रेयः नित्यकृतपौर्वाह्निकक्रियां सम्पाद्य प्रणिपत्याभिवाद्य च पराशरमहर्षिं परिपप्रच्छ हे महानुभव! भवतः सकाशात् अहं कृत्स्नं वेदवेदाङ्गधर्मशास्त्रादीनां सम्यगध्ययनं चकार। इदानीमहं जगतः उत्पत्तिं तथा तस्य क्रमस्वरूपं ज्ञातुमिच्छामि। तथा च अस्य जगतः उपादानकारणं तदतिरिक्तं भूतानां परिणाम-समुद्र-पर्वत-देवानामुत्पत्ति-वंशवंशानुचरित-मनु-मन्वन्तर-कल्प-प्रलयस्य स्वरूपं-युगानां पृथक् धर्म- राजर्षीणां चरित- ब्राह्मण-ब्रह्मचर्यादीनां विशद् वर्णनं ज्ञातुमिच्छामि।

एतेषां समेषां प्रश्नानां जिज्ञासां दृष्ट्वा प्रहृष्टः महर्षिः पराशरः तमुवाच त्वया पुरा श्रीवसिष्ठेन कथिता कथा स्मारिता। एतत्सर्वं कृत्स्नं पुरा वसिष्ठेन तथा पुलस्त्येन उक्तं वर्तते। हे मैत्रेय! पुरा विश्वामित्रप्रेरणया राक्षसैः सर्वं भक्षितं; ततोऽहं रक्षसां विनाशाय सत्रं समारभम्। तत्र शतशः राक्षसाः भस्मीभूताः अभवन्। तदानीं मत्पितामहः महर्षिः वसिष्ठो मामुवाच एतेषां राक्षसानां न कोऽपि अपराधो वर्तते यत् भवितव्यं तत् केनचिदपि स्यात्। अलमत्यन्तकोपेन मूढानामेव क्रोधो भवति नतु ज्ञानवतां विदुषां। प्रपञ्चे केनचित् कः हन्यते यतः स्वकृतभुक्पुमान् भवति। अतोऽहं तस्य परामर्शेण सत्रमपसंहृतवान्। तदानीं ब्रह्मणः पुत्रः पुलस्त्यः तत्र आजगाम, तथा मामुवाच क्रुद्धेनापि यतः मम सन्ततेर्न त्वया विनाशः कृतः ततोऽहं तुभ्यं महावरं ददामि। हे वत्स भवान् सर्वाणि शास्त्राणि वेत्स्यति, तथा पुराणसंहितानां महावक्ता भविष्यति, देवानां तथा परमार्थ्यं तत्त्वं वेत्स्यति। प्रवृत्तौ निवृत्तौ च भवतः मतिः अस्तमलां न यास्यति। तस्मात् सः पराशरः जगतः सृष्टिस्थितिलयानां ज्ञानं प्राप्तवान्।

बोधप्रश्नाः

१. मैत्रयस्य प्रश्नः कः असीत्?

२. पराशरः पुराणानां वक्ता भविष्यतीति महावरः केन प्रदत्तः?

३. राक्षसानां विनाशार्थं पराशरः किं चकार?

## भगवतः श्रीविष्णोः महिमा जगत्कारणत्वं च –

ब्रह्माविष्णुमहेश्वररूपेण सदाविद्यमानाय प्रपञ्चस्य जन्मस्थितिभङ्गस्य च मूलकारणाय सदैकरूपरूपाय नित्याय शुद्धाय परमात्मने वासुदेवाय श्रीविष्णवे नमः इत्युक्त्वा पराशरः श्रीविष्णोः महिमा तथा गुणगानं चकार।

अत्र श्रीविष्णोः सर्वव्यापकत्वं, सर्वान्तर्यामित्वं, व्यक्ताव्यक्तत्वं, भक्तानां मुक्तेः कारणत्वं, चराचरस्य विश्वस्य उत्पत्तिहेतुकत्वं, स्थितिसंहारयोः कर्तृत्वं, सर्वाधिष्ठानत्वं प्रतिपादितं वर्तते, यः अजन्मा, जगदीश्वरः, अक्षयः, अव्ययः अविनाशी निर्मलज्ञानस्वरूपः सूक्ष्मातिसूक्ष्मः पुरूषोत्तमश्च वर्तते।

एतत्सर्वं भूभुजे नर्मदातटे दक्षादिमहर्षयः राजर्षये पुरुकुत्साय, पुरुकुत्सः सारस्वताय, तथा सारस्वतः मह्यमुपादिदेशः। यः रूपवर्णजन्मवृद्धिपरिणामक्षयनाशादिभ्यो विकारेभ्यः रहितः नित्यः सनातनश्च विष्णुः अस्य स्थावरजङ्गमात्मकस्य जगतः मूलकारणमिति पापठ्यते। सर्वत्र वसतीति हेतोः वासुदेवः विद्वद्भिः परिपठ्यते च। तदेव ब्रह्म नित्यमजयमक्षयमव्ययमेकस्वरूपं सदा हेयाभावाच्च निर्मलमिति चकास्ति। असौ विष्णुः चतुर्भिः परमरूपैः सर्वं ससर्ज। प्रथमस्वरूपं-प्रकृतिः, द्वितीयस्वरूपं-पुरुषः, तृतीयं-व्यक्तः, चतुर्थं-कालश्चेति।

**बोधप्रश्नाः**

१. दक्षादय कं सृष्टेः प्रक्रियां श्रावयामास ?

२. भगवान् विष्णुः कतिभिः रूपैः जगत् ससर्ज ?

## चतुर्विंशतितत्त्वानामुत्पतिः क्रमश्च –

प्रकृत्याः साम्यावस्थायां यदा क्षेत्रज्ञस्य अधिष्ठानात् गुणेषु क्षोभः उत्पद्यते। ततः प्रधानतत्त्वं मद्भुतं महान्तं समावृणोत्। महत्तत्त्वादहङ्कारस्य उत्पत्तिर्भवति। अयमहङ्कारः सात्त्विकराजसिकतामसिकरूपेण वैकारिकस्तैजसस्तथा भूतादीनामुत्पत्तेः कारणं भवति। त्रिगुणात्मककारणतः भूतेन्द्रियाणां कारणं महत् यथा प्रधानेन अवृतं तथा अहङ्कारोऽपि महत्तत्वे समावृतो वर्तते। भूतः तु शब्दतन्मात्रात्मकं शब्दलक्षणयुक्तमाकाशं ससर्ज। ततः आकाशात् स्पर्शमात्रं वायुः समजायत। ततः वायोस्तदरूपगुणः रूपतन्मात्रभूतज्योतिः समजायत। तेजः विकुर्वाणः रसतन्मात्रं ससर्ज। तदपि जलरूपतन्मात्रं तेजसि आवृतमभवत्। जलानि गन्धमात्रं ससर्जिरे। एतेषां तन्मात्राणां विशेषसंज्ञा न भवति अतः अविशेषसंज्ञा भवति। एतादृशरूपेण तामसाहङ्कारात् भूततन्मात्राणामुत्पत्तिरभवत्।

दशेन्द्रियाणामुत्पत्तिः राजसिकाहङ्कारात् तथा तेषां देवताः वैकारिकसात्त्विकाहङ्कारत् उत्पद्यन्ते। अतः इन्द्रियाणामधिष्ठाता दशदेवाः तथा मनः वैकारिकसात्त्विकश्च भवति। त्वक्-चक्षु-नासिका-जिह्वा-श्रोत्रख्यानि

पञ्चज्ञानेन्द्रियाणि बुद्धियुक्तानि सन्ति। तथा वाक्पाणिपादपायूपस्थख्यानि पञ्चकर्मेन्द्रियाणि भवन्ति। आकाशादीनि पञ्चमहाभूतानि क्रमशः शब्दादिषु गुणेषु युक्ताः भवन्ति। एतानि पञ्चभूतानि शान्त-घोर-मूढ़-सुख-दुःखात्मकानि च सन्ति। अतः एतानि भूतानि विशेषानि प्रोक्तानि। एतेषु भूतेषु पृथक् पृथक् शक्तयः भवन्ति। अतः एतेषां परस्परसम्मेलनं विना किमपि कार्यं भवितुं नार्हति। प्रधानस्यानुग्रहेण एकस्य संघातस्य उत्पत्तिनिमित्तं महत्तत्त्वतः विशेषपर्यन्तं सर्वाणि तत्त्वानि पुरुषेषु अधिष्ठतकारणतः अण्डमेकमुत्पादयन्ति। जलबुद्बुद्वत्समं तत् क्रमशः विवृद्धं अण्डं ब्रह्मणः स्वरूपविष्णोः आधारः समजायत। तत्रैव अव्यक्तस्वरूपसाक्षात् भगवान् विष्णुः व्यक्तस्वरूपहिरण्यगर्भरूपेण व्यवस्थितः आसन्। अयं हिरण्यगर्भः सर्वेषां गर्भाशयस्थरसरूपेण विद्यमानः आसीत्। एतस्मादेव अण्डकोषात् पर्वतद्वीपादिभिः सह सर्वेषां देवमानवदानावानामुत्पत्तिः अभूत्। एतदण्डं पूर्वापेक्षया दशगुणयुक्तं तामसाहङ्काररेषु आवृतमभवत्।

एतैः सह तस्मिन् अण्डे भगवान् विष्णुः संसारस्य रचनायां ब्रह्मस्वरूपेण रजोगुणं समाश्रय प्रवृत्तः आसन्। तस्माद्दिनात् सत्त्वगुणयुक्तः विष्णुः आसंसारं कल्पकल्पान्तपर्यन्तं सर्वान् भुनक्ति। पुनः कल्पान्ते रुद्रस्वरूपं तमोरूपं धृत्वा आसंसारं भक्षयति। ततः पुनः ब्रह्मरूपं धृत्वा प्रपञ्चस्यास्य निर्माणे प्रवृत्तो भवति। भूतानामुपकाराय सः एव विष्णुः साक्षात् विश्वरूपं धृत्वा सर्गादीनं कारणस्वरूपं भवति।

बोधप्रश्नाः

१. महत्ततः कः उत्पद्यते ?

२. कः सर्वान् भुनक्ति ?

३. कः संहारकर्ता वर्तते ?

## कालनिरूपणम् –

शिष्यश्रेष्ठस्य मैत्रेयस्य परिप्रश्नेन भगवान् पुराणवक्ता पराशरः कालस्य स्वरूपं तथा गणनाप्रसङ्गः तमुवाच। सर्वेषां चराचराणां जीवानां कीटपतङ्गानामायुः निर्णीयते। कालस्वरूपमेवं ब्रुते–

पञ्चदशनिमेषैः एका काष्ठा भवति। त्रिंशत् काष्ठैः एका कला, तथा त्रिंशत् कलाभिः एकः मुहूर्त्तो भवति। एतदधः प्रतिपाद्यते–

| | |
|---|---|
| १५ निमेषाः | १ काष्ठा |
| ३० काष्ठाः | १ कला |
| ३० कलाः | १ मुहूर्त्तः |
| ३० मुहूर्त्ताः | १ मनुष्य अहोरात्रम् |
| १५ अहोरात्रम् | १ पक्षः |
| २ पक्षौ | १ मासः |
| ६ मासाः | १ अयनम् |
| २ अयने | १ वर्षम् |

दक्षिणायने देवानां रात्रिस्तथा उत्तरायणे दिनञ्च भवति। देवानां द्वादशसहस्रवर्षैः चतुर्युगाः सत्यत्रेताद्वापरकल्याख्याः भवन्ति। एतेषां युगानां कालगणना भिन्ना भवति। एतेषां चतुर्युगानां परिमाणः चतुत्रीणिद्वैचैकं दिव्यवर्षं भवति। प्रत्येकं युगानां तथैव वर्षं सन्ध्यारूपेण वर्तते। एतत् चतुर्युगं ब्रह्मणः दिनं तथा पुनः चतुर्युगं यावत् रात्रिश्च भवति। सर्वे सप्तर्षयः, देवाः, इन्द्रः,मन्वादयः एकस्मिन् कल्पे सृज्यन्ते तथा एकस्मिन् कल्पे संह्रियन्ते।

एतद्व्यतिरिच्य मन्वादीनां मन्वन्तराख्यं कालमानं भवति। तत् मनोः सम्बन्धवशात् मन्वन्तराख्या संज्ञा। मानववर्षकलनायां मन्वन्तरं ३०६७२०००० भवति। एतस्य कालमानस्य १४गुणात्मकं ब्रह्मणः दिनं भवति। ततः नैमित्तिक ब्राह्मप्रलयो भवति। अस्मिन् समये भूर्भुवस्वर्लोकादयः दह्यन्ते। तापार्ताः जनलोकाधिवासीनः महर्लोकं प्रयान्ति। ततः योगीभिः नारायणाख्यभगवान् विष्णुः ध्यायते। एतादृशरूपेण कालमानं प्रस्तुतम्।

बोधप्रश्नाः

१. मानववर्षकलनायां मन्वन्तरस्य मानं कियत् भवति ?

२. कतियुगाः ब्रह्मणः दिनात्मकं कालं भवति ?

३. कति दिव्यवर्षैः एकयुगः भवति ?

## सारांश: –

अध्यायेऽस्मिन् ग्रन्थस्यास्य श्रवणकीर्तनाख्यं महाफलं तथा ग्रन्थवक्ता परशरमैत्रेययो: कथोपकथनं समुपवर्ण्यते। मैत्रेयं प्रति सृष्टे: सकलरहस्यं तथा सृष्टे: उत्पत्तिविषयकं रहस्यं पराशर: प्रतिपादयामास। तत: सर्वेषां तत्त्वानामुत्पत्तिविषयकं चित्रणं तथा सर्वेषां विष्णो: स्वरूपे व्यवस्थितत्त्वं प्रतिपादितम्। विष्णो महिमादिकमपि समुपवर्णितम्। ब्रह्मादीनामायु: तथा मन्वन्तरस्य कालगणनादिसर्वं विधिवत् प्रतिपाद्यते। अण्डस्वरूपस्य वर्णनां कृत्वा तत: भूतजातस्य उत्पत्तिविषयकं विवरणं प्रस्तुतम्। विष्णो: प्रलयकाले अनन्तशयनविषयमपि ग्रन्थस्यास्य महत्वैशिष्ट्यं प्रतिपादयति। प्रसङ्गपूर्वकं पुराणस्य पञ्चलक्षणानि अत्रैव सर्वादौ उट्टङ्कितानि। प्रलयानां सृष्टे: सकलाव्यवस्था अत्र सम्यक् प्रतिपादिता वर्तते।

# आदर्शप्रश्ना:

## लघूत्तरीयप्रश्ना: -

१. अहङ्कारस्य स्वरूपम् ।

२. मैत्रेयमुने: जगत्विषयकप्रश्नः ।

३. विष्णुपुराणस्य श्रवणफलम् ।

## विश्लेषणात्मकप्रश्ना: –

१. चतुर्विंशतितत्त्वानामुत्पत्तिः क्रमशः स्पष्टयत ।

२. पुलस्त्यस्य वरदानं वर्णयत ।

३. विष्णोः महिमा लिखत ।

## निबन्धात्मकप्रश्ना: –

१. जगदुत्पत्तेः प्रक्रिया क्रमशः विशदयत ।

२. सम्पूर्णं कालमानं विशदयत ।

३. मैत्रेयपराशरयोः कथोपकथनं स्पष्टयत ।

## एकाङ्कप्रश्ना: –

१. पराशरः कं श्रावयामास ?

२. पराशरस्य पिता कः ?

३. पुलस्त्य कस्य पत्रः ?

४. जगतः मूलकारणभूतः कः ?

५. कः पराशराय वरं ददौ ?

६. विष्णुः कतिभिः रूपैः संसारं ससर्ज ?

७. कति युगाः भवन्ति ?

८. संहारसमये विष्णोः स्वरूपं किम् ?

९. राजसिकं स्वरूपं कस्य देवस्य ?

१०. तामसिकस्वरूपं कस्य देवस्य भवति ?

११. सात्विकप्रकृतिकः कः वर्तते ?

१२. मनोः कालमानं किमुच्यते ?

१३. कति मनवः सन्ति ?

**उत्तराणि –**

१. मैत्रेयं २. शक्तिः ३. ब्रह्मणः ४.विष्णुः ५. पुलस्त्यः ६. ४ ७. ४

८. रुद्रस्वरूपं ९. ब्रह्मणः १०. रुद्रस्य ११. विष्णुः १२. मन्वन्तरं १३. १४ मनवः

# द्वितीयोऽध्यायः

## प्रस्तावना –

विष्णुपुराणस्य प्रथमोऽंशे अध्यायेऽस्मिन् कल्पस्य प्रारम्भे नारायणाख्योऽसौ ब्रह्मा यथा सृष्टिं ससर्ज तत्सर्वं कृत्स्नं प्रतिपाद्यते। भगवतः श्रीविष्णोः अवतारप्रसङ्गक्रमे वराहावतारेण पृथिव्याः उद्धारस्तथा सर्गप्रक्रिया वर्णिता दृश्यते। पृथिव्याः प्रार्थना, भगवत्स्तुतिः, अविद्यादि विविधानां सर्गाणां सृष्टिप्रक्रिया समुपवर्णिता वर्तते। देवदानवपितृपुरूषवृक्षपन्नगादीनां सृष्टिप्रक्रिया, पुरूषार्थसाधकभूता अर्वाक्स्त्रोतसृष्टिप्रक्रियेत्यादीनां चित्रणं दरीदृश्यते। चातुर्वण्य-व्यवस्था, ब्राह्मणादीनामुत्पत्तिः, गुणवर्णकर्त्तव्यादीनां प्रसङ्गः प्रतिपादितः। श्रीविष्णोः माहात्म्यप्रतिपादनावसरे एतादृशं निखुणं वर्णनं सर्वतन्त्रस्वतन्त्रस्थानमलङ्करोति। सात्त्विकपुराणेषु इदं महापुराणं सृष्टिप्रक्रियावर्णनाप्रसङ्गे मुख्यभूमिकां निर्वहति। पुराणानां लक्षणं यथासाम्यं च प्रतिपादयति। सर्गादीनां सर्वादौ यथावर्णनं वर्तते तत् क्रमशः पुराणलक्षणमनुयाति। अस्मिन् प्रसङ्गे सृष्टिविषयकं सर्वं तथ्यमत्र सम्यक् प्रतिभाति। एतत्सर्वमस्य पुराणस्य वैशिष्ट्यं महत्त्वं च बहुगुणितं कृत्वा आसंसारं वितनोति।

## उद्देश्यम्—

प्रियपाठकाः! अस्मिन् अध्याये वयं सर्वे अधोलिखितान् विन्दून् आलोचयिष्यामः। तथा गभीरान् तथ्यान् सग्रहणं कृत्वा चर्चां करिष्यामः।

- पृथिव्याः भगवत्स्तुतिः
- वराहद्वारा पृथिव्याः उद्धरणम्
- अविद्यादि सर्गाणां वर्णनं
- देवादीनां सृष्टिप्रक्रिया
- चातुर्वण्य-व्यवस्था
- पृथिव्याः विभागः
- अन्नादीनामुत्पत्तिः
- द्वादशाक्षरनाममन्त्रस्य महात्म्यम्

## पृथिव्याः भगवत्स्तुतिः –

पुराकाले कृत्स्नं जगत् जले विलीनः बभूब। पूर्वस्मिन् कल्पे भगवान् मत्स्य,कूर्मादि रूपं धृत्वा आसंसारमभुनक्। तस्मिन् वाराहकल्पे भगवान् वराहरूपं धृत्वा पालनं चकार। यदा पृथिवी जले प्रविष्टा जाता तदानीं तया भगवत्स्तुतिः आचरिता, त्वत्तोऽहं पूर्वमुत्थिता इत्युवाच। हे भगवन्! भवानेव सर्वेषां भूतानां जन्मस्थितिभङ्गरूपस्य कारणम्, प्रलये एकार्णवकाले सर्वं भक्षयित्वा जले शयनं चकार। त्वमाराध्य परं ब्रह्म तथा मुमुक्षवः मुक्तिं यान्ति। यत्किञ्चिन्मनसा चक्षुरादिभिः ग्राह्यं भवति तद्रुपमखिलं तवैवेति निश्चप्रचमेव। त्वमेव अखिलप्रपञ्चस्य आधारभूतं तत्त्वं, त्वमेव वेदास्त्वंमेव तदङ्गानि त्वं यज्ञपुरुषः पुरुषोत्तमश्च। त्वमेव मूर्तामूर्तमदृश्यं दृश्यं च । एतादृशी वहुविधा स्तुतिः पृथिव्या आचरिता।

बोधप्रश्नः

१. पृथिवी कस्य स्तुतिमकार्षीत्?

२. कस्मिन् कल्पे भगवान् वराहरूपं धारणं चकार?

## अविद्यादि सर्गाणां वर्णनम् –

शिष्यप्रवरः मैत्रेयः विविधान् सर्गान् वर्णयितुमवादीत्। तदानीं पराशरः तमुवाच ब्रह्मणः अविद्यया तमोमयः सर्गः प्रादुर्भुतः। एतस्मात् तम-मोह-महामोह-तमिस्त्र-अन्धतमिस्त्रात्मकं पञ्चपर्वैषा अविद्या प्रादुर्भुता। एतत्सर्वं तमोमय-विवेकरहितत्त्वं वर्तते। पुनः एतदनिश्चितमिति मत्वा तीर्यक्-सर्गं ससर्ज। अस्मिन् सर्गे सर्वे अहङ्काराभिमानवन्धैः ग्रसिताः अभूवन्। पुरुषार्थस्यासाधकमिति मत्वा उर्ध्व-स्त्रोतात्मकं तृतीयं सात्त्विकं सर्गं ससर्ज। एतस्य सर्गस्य नामान्तरं भवति देवसर्गः।

एतदतिरिच्य साधाकानां कृते मुख्यात्मकं सर्गं दधौ। यस्य सर्गस्य नाम अर्वाक्-सर्गः। अत्र सर्वेऽपि जीवाः अधोभागे तिष्ठन्ति, सर्गेऽस्मिन् सत्त्वरजतमसां साम्यता वर्तते। एतादृशरूपेण षडत्र सर्गाःप्रतिपादिताः। यथा –

महत्सर्गः (महतः सृष्टिः)

भूतसर्गः (पञ्च तन्मात्राणां सृष्टिः)

वैकारिकसर्गः (इन्द्रियाणां सृष्टिः)

प्राकृतसर्गः (नग-वृक्षादीनां सृष्टिः)

तिर्यक्-सर्गः (कीट-पतङ्गादीनां सृष्टिः)

देवसर्गः (उर्ध्वलोके देवानां सृष्टिः)

अर्वाक्-सर्गः (मनुष्याणां सृष्टिः)

अनुग्रहसर्ग (असौ च सर्गः अष्टविधः, पञ्च वैकृतसर्गास्तथा प्राकृतास्तु त्रयः)

कौमारसर्गः (एतदुभयं प्राकृतिकं तथा वैकृतिकं च)

एवं नवविधसर्गाणां वर्णनं पुराणेऽस्मिन् समुपवर्णितं वर्तते।

## चातुर्वर्ण्यव्यवस्था –

प्रजापतिः ब्रह्मा अर्वाक्सर्गस्य सर्जनां कृत्वा मानवादीन् असृजयत्। मैत्रेयः पराशरं प्रति पप्रच्छ हे महाभग! कृपया ब्राह्मणादीनां कर्तव्यं कर्माणि च तथा तेषां गुणान् ब्रुहि। ततः पराशरः सिसृक्षोः ब्रह्मणः सकाशात् सत्याभिधायिनः सत्त्वोद्रिक्ता मुखात्प्रजाः अजायन्त। ततः तस्मात् ब्रह्मणः बक्षस्थलात् राजसेद्रिक्ताः ऊरुतः तामसाः अजायन्त। पद्भ्याम् अन्याः प्रजाः भगवान् ब्रह्मा ससर्ज। एवं क्रमेण क्रमशः ब्रह्मणः सकाशात् मुखवक्षोरुपादस्थलेभ्यो ब्रह्मणक्षत्रियवैश्यशुद्रादीनामुत्पत्तिरभूत्। सर्वमेतत् चातुर्वर्णं ब्रह्मा यज्ञकारणवशतः चकार। यज्ञे तृप्ताः देवाः मानवानामिष्टवस्तुनि तेभ्यः सर्वेभ्योः ददुः। ये मानवाः सदाचारशीलाः, स्वधर्मपरायणाः, सज्जनाः, सुमार्गगामीनः सन्ति ते एव यज्ञस्य समीचीनरीत्या सम्पादनं कर्तुं शक्नुवन्ति। मानवः स्वकर्मणा एव स्वाभिलषितं स्थानं प्रति गन्तुं शक्नोति। स्वर्गापवर्गं च प्राप्तुं शक्नोति।

श्रीहरेः कालात्मको यः चांशः पुरा मया कथितः, स एव तासु प्रजासु अधर्मबीजस्वरूपं तमरागलोभादिकं सर्वं प्रवृतं कारयति। ततः तेभ्यो विष्णोपदप्राप्तिनिमित्तं स्वाभाविकसिद्धिस्वरूपं रसोल्लासं च न प्राप्तुं शक्यते। क्षीणसिद्धाः सन्तः सर्वेऽपि द्वन्दह्रासदुखादिग्रस्ताः भूत्वा अशेषक्लेशमनुभवन्ति। ततः मानवाः गृहाणि च यथान्यायं शीतातपादिबाधानां प्रशमाय महामते चक्रुः। प्रजाः जीविकायाः साधनभूतरूपेण कृषिकार्यादिकं चक्रुः। ब्रीहयः यवाः, गोधूमाः, अणवः, तिलाः, प्रियङ्गवः, ह्यदाराः, कोरदूषाः, सतीनकाः,

माषाः, मुद्गाः, मसूराः, निष्पावाः, सकुलत्थकाः, आढ़क्याः, चणकाः, शणाः इत्येतासां ओषधीनां जातयः तथा ग्राम्यारण्याश्चचतुर्दशयाज्ञिकाः भवन्ति।

बोधप्रश्नाः

१. कति याज्ञिकाः भवन्ति।

२. कतिवर्णाः भवन्ति ?

## चातुर्वण्य-प्रजानां स्थानानि–

यथास्थानं यथागुणं ब्रह्मा प्रजाः सर्वाः स्थापयामास। क्रियावतां ब्राह्मणानां स्थानं पितृलोके वर्तते। युद्धक्षेत्रेषु न निवर्ततां क्षत्रियाणां स्थानमिन्द्रलोकं वर्तते। स्वधर्मपालनरताः वैश्याः वायुलोके सेवापरायणाः शुद्राः गन्धर्वलोके च निवसन्ति। अष्टाशीतिसहस्राणि ऊर्ध्वरेतसां मुनीनां यत् स्थानं वर्तते विद्याध्ययनवतां योगीनामपि तत्स्थानं लभ्यते।

वानप्रस्थानां जनानां स्थानं ब्रह्मलोके भवति। अत्मनि सन्तुष्टाः योगिनः परमपदे अमरधाम्नि भवन्ति मरणानन्तरमेव। एकान्तनिवासिनः तु यत् पदं भवति तत् केवलं ब्रह्मध्यायिनः योगिनः द्रष्टुं शक्नुवन्ति। ये च पापिनः स्वकर्मधर्मविरताः भवन्ति ते तामिस्रान्धतामिस्रमहारौरवरौरवासिपत्रवनाघोरकालसूत्रावीचिकादि नरकेषु परिभ्रमन्ति।

**बोधप्रश्नाः –**

१. ब्राह्मणानां स्थानं कुत्र भवति ?

२. कति ऊर्ध्वरेतसः सन्ति ?

**द्वादशाक्षरनाममन्त्रस्य माहात्म्यम् –**

सम्पूर्णेऽस्मिन् पञ्चतत्त्वाञ्चितप्रपञ्चे विष्णुरेव साक्षात् परमेश्वरः परमपूज्यः देवाधिदेवश्च वर्तते। सर्वेषां जनिमतां प्राणिनां स्वस्थानस्य कथनादनन्तरं पराशरः मुनिः श्रीविष्णोः द्वादशाक्षरनाममहामन्त्रस्य वर्णनां विदधाति। **ॐ नमो भगवते वासुदेवाय** इति महामन्त्रस्य चिन्तनं यः जनः करोति परमं पदं गत्वा पुनः न निवर्तति। विष्णोः परमं पदं प्राप्तुं ऋषयः मुनयः सर्वेऽपि अहर्निशम् अस्य मन्त्रस्यास्य मननं चिन्तनं च कुर्वन्तः कालं यापयन्ति। तत्त्वदर्शिनः ज्ञानिनः सर्वेऽपि विष्णोः तत् पदं निमित्तं सर्वदा ध्यायन्ति। कालानुसारं समेषां ब्रह्मादीनामपि कार्ये जाते पूर्णतामायाति परन्तु विष्णोः द्वादशाक्षरनाममन्त्रस्य जपकर्ता कदाचिदपि तस्मात् न पुनरावर्तते। सूर्यचन्द्रादिग्रहाः स्वस्थाने सर्वदा न तिष्ठन्ति परन्तु द्वादशाक्षरमहामन्त्रस्य जपकर्ता चिन्तनकर्ता च मोक्षपदात् कदाचिदपि न पुनरावर्तते।

बोधप्रश्नाः –

१. कस्य नाममहामन्त्रस्य स्मरणेन परमपदं लभ्यते ?

२. द्वादशाक्षरमहामन्त्रः कः ?

**सारांशः –**

अवतारभूतस्य श्रीविष्णोः अवतारमीमांसा योगिभिः तत्त्वदर्शिभिरपि दुर्बोधा तथा अचिन्तनीया वर्तते। यदा यदा धर्मस्य ग्लानिर्भवति अधर्मस्य अभ्युत्थानं भवति तदानीं भगवान् लीलामयः श्रीविष्णुः धरापृष्ठे अवतरति। वारहावतारे जलपूर्णपृथिव्याः उद्धारं श्रीविष्णुः स्वयमेव वारहं रूपं धृत्वा चक्रे। साक्षात् पृथिवी भगवतः श्रीविष्णोः स्मरणं कृत्वा स्तुतिं चकार। ततः भगवान् विष्णुः वारहरूपं धृत्वा दन्ताभ्यां पृथिवीं जलात् धारयामास। ततः मैत्रेयस्य परिप्रश्नस्य समाधानं कर्तुमुद्यतः पराशरः सर्गादीनां वर्णनं प्रतिपादयामास। तत्र ब्रह्मणः सकाशात् अविद्यादि विविधानां सर्गाणां वर्णनं प्रतिपादितं वर्तते। अविद्यायाः भेदाः नवविधानां सर्गाणां प्रादुर्भावादिकं यथोचितं प्रतिपादितम्। ब्राह्माणादि चातुर्वण्यानां प्रजानामुत्पत्तिविषयकं विवरणं प्रस्तुतमत्र। तेषा गुणकर्मादि विवरणमपि संक्षेपेण विहितम्। विशेषतया श्रीविष्णोः द्वादशाक्षरनाममहामन्त्रस्य प्रसङ्गः अस्याध्यायस्य महन्महत्त्वं प्रद्योतयति। यत् फलं श्रवणकीर्तनादिषु न लभ्यते तत् सर्वं श्रीविष्णोः द्वादशाक्षरनाममहामन्त्रस्य जपद्वारा लभ्यते। एतत् सर्वम् अध्यायेऽस्मिन् समुपवर्णितं दृश्यते।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. नवविधसर्गानां नामानि वर्णयत ?

२. चातुर्वर्णानां स्वरूपं वर्णयत ?

३. मुख्यसर्गं विशदीकुरुत ?

**विश्लेषणात्मकाः प्रश्नाः –**

१. सर्गभेदान् निरूपयत।

२. अविद्यादीनां क्रमं लिखत।

३. पृथिव्याः स्तुतिं प्रतिपादयत।

**निबन्धात्मकाः प्रश्नाः –**

१. वर्ण-व्यवस्थां विशदयत।

२. वराहावतारप्रसङ्गं प्रतिपादयत।

३. अविद्यादीनां सर्गाणां स्वरूपं लिखत।

**एकाङ्कप्रश्नाः –**

१. पराशरः कं सृष्टिप्रक्रियां श्रावयति ?

२. मैत्रयस्य गुरुः कः ?

३. कति सर्गाः प्रोक्ताः ?

४. अविद्याः कतिविधाः ?

५. कति वर्णाः भवन्ति ?

६. मुख्यसर्गः कः ?

७. कस्य प्राकृतिकं वैकृतिकं च संज्ञा वर्तते ?

८. विष्णुपुराणे कति श्लोकाः विद्यन्ते ?

९. पृथिवीं कः स्वद्रंष्टाभ्यां दधौ ?

१०. विष्णुपुराणस्य श्रोता कः ?

११. प्रलयः कतिविधः ?

१२. पुराणस्य कति लक्षणानि विष्णुपुराणोक्तानि ?

**उत्तराणि—**

| | | | | | |
|---|---|---|---|---|---|
| १. मैत्रेयं | २. पराशरः | ३. नव | ४. पञ्च | ५. चत्वारः | ६. अर्वाक् सर्गः |
| ७. कौमारसर्गस्य | ८. २३००० | ९. वराहः | १०. मैत्रेयः | ११. चतुर्विधः | १२. पञ्चलक्षणानि |

# तृतीयोऽध्यायः

## प्रस्तावना –

अध्यायेऽस्मिन् बहूनां देवानामुत्पत्तिविषयकं वृतान्तं समुपवर्णितं वर्तते। अत्र अविद्यादि नवसर्गातिरिच्य अन्यान् सर्वान् सर्गान् तथा मरीच्यादीनां सृष्टिविषयकं तथ्यं प्रतिपाद्यते। प्रजापतेः पुत्रपौत्रादीनां वर्णनं उपलभ्यते। मानसपुत्राणां विषये कन्यानामुत्पत्तिप्रसङ्गः पुराणस्यास्य वैशिष्ट्यं प्रतिपादयति। उत्पत्तिविषयकं समेषां विवरणं प्रस्तुतमस्मिन् अध्याये। अत्र ब्रह्मणः सकाशात् प्रजानां तथा रुद्रस्य सृष्टिविषयकं चित्रणं प्रतिपादितम्। प्रलयानां भेदोपभेदपूर्वकं वर्णनं समुपलभ्यते। भगवतः श्रीविष्णोः स्वरूपं तथा श्रीलक्ष्म्याः सर्वव्यापकत्त्वं प्रतिपाद्यते। दुर्वससा इन्द्राय मालाप्रसङ्गे श्रापविषयः उक्तः। श्रीविष्णोः तथा श्रीलक्ष्म्याः स्तुतिवर्णनमस्याध्यायस्य प्रमुख्यं वैशिष्ट्यं वितनोति।

## उद्देश्यम् –

तृतीयोऽध्यायेऽस्मिन् वयं सर्वे एतान् विन्दून् ज्ञास्यामः।

- मरीच्यादीनामुत्पत्तिः।
- स्वायम्भुवमनोः आविर्भावः
- लयस्वरूपम्
- रौद्रसृष्टिः
- भगवती श्रीलक्ष्म्याः सर्वव्यापकत्त्वम्
- दुर्वाससः श्रापः
- समुद्रमथनम्

**मरीच्यादीनामुत्पत्तिः–**

पुनः प्रजापतेः सकाशात् मानसप्रजाः तच्छरीरसमुत्पन्नैः कारणैः सह जज्ञिरे। जडगात्रेभ्यो ब्रह्मणः सकाशात् धीमतां चेतनजीवानां प्रादुर्भावः सञ्जातः। एवं रीत्या सर्वेषां चराणामचराणां जीवजगतां सृष्टिरभूत्। यदा अस्य प्रजापतेः पुत्रपौत्रादयः क्रमशः न व्यवर्धन्त ततः अन्यान् मानसान् पुत्रान् ससर्ज। ते च यथा – भृगु-पुलस्त्य-पुलह-क्रतु-अङ्गिरा-मरीचि-दक्ष-अत्रि-वसिष्ठादयः सर्वे नव ब्रह्माण इति प्रोच्यन्ते। पुनः ख्याति-भूति-सम्भूति-क्षमा-प्रीति-सन्नति-ऊर्जा-अनसूय–प्रसूत्याख्यां नवकन्याः असृजत्। ततः पत्न्यो भवध्वमित्युक्त्वा तेषां महात्मनां कृते ददौ।

पूर्वं वेधसा सनकसनातनसन्दादयो ये सृष्टाः ते लोकेषु निरपेक्षरूपेण तिष्ठन्तः संसारसन्तत्यादिषु विरताः अभवन्। ते सर्वे ज्ञानशीलाः, विरक्तास्तथामत्सरादि दोषरहिताः निरपेक्षाः वीतरागाः आसन्। तेभ्यो महान् त्रैलोक्यदहनक्षमः क्रोधः आगतः। तस्मात् क्रोधात् अतिदीप्तज्वाला समुत्पन्ना जाता। तेषां ललाटात् मध्याह्नार्कसमप्रभः रुद्रः समुत्पन्नः। ततः तच्छरीरं स्त्रीत्वं पुरुषत्वं द्विधा चकार। पुनः पुरुषभागं एकादशधा तथा च स्त्रीभागं सौम्य-क्रुर-शान्ताशान्त-श्याम-गौरादि बहुभागमकार्षीत्।

**बोधप्रश्नाः**

१. सनकादयः किमर्थं क्रोधिताः अभूवन् ?

२. नवकन्याः काः ?

३. मानसपुत्राः के ?

## स्वायम्भुवमनोः आविर्भावः

समेषां प्रादुर्भावानन्तरं प्रजानां परिपालनार्थं ब्रह्मा आत्मसम्भूतं स्वायम्भुवं मनुं ससर्ज। ततः तपोनिर्धूतकल्मषां शतरूपाख्यामेकां नारीं पत्नीत्वेन जगृहे। तस्याः शतरूपायाः अपि प्रियव्रतोत्तानपादाख्यौ द्वौ पुत्रौ तथा रूपौदार्यगुणान्विते प्रसूत्याकूती जायेते स्म। प्रसूतिं दक्षाय तथा आकूतिं रुचये ददौ। रुच्याकूतिभ्यां

यज्ञ-दक्षिणात्मकौ द्वौ (युगल) अभूताम्। पुनः यज्ञस्य दक्षिणायां द्वादशपुत्राः जज्ञिरे। ये च द्वादशपुत्राः यामा इति समाख्याताः अभवन्। ततः दक्षस्य प्रसूतितः चतुर्विंशतिकन्यानां प्रादुर्भावः जातः, ताः भवन्ति श्रद्धा-लक्ष्मी-धृति-तुष्टि-मेधा-पुष्टि-क्रिया-बुद्धि-लज्जा-वपु-शान्ति-सिद्धि-कीर्ति-त्रयोदशी। पुनः पूर्वं याः एकादशसुलोचनाः कन्याः क्रमशः भृग्वादयः महर्षयस्तथा अग्निः पितरादयः जगृहुः।

ततः एतासां सकाशादपि बहवः जज्ञिरे। श्रद्धा कामं, चला दर्पं, धृतिः नियमं, तुष्टिः सन्तोषं, पुष्टिः लोभं, मेधा श्रुतं, क्रिया दण्डं-नयं-विनयञ्च, बुद्धिः बोधं, लज्जा विनयं, वपुः व्यवसायं, शान्तिः क्षेमं, सिद्धिः सुखं, कीर्तिः यशः, रतिः हर्षं च असूयत।

अधर्मस्य पत्नी हिंसा तथा ततः अनृताख्यः पुत्रः निकृत्याख्या कन्या जज्ञे। ताभ्यामनृतनिकृताभ्यां भयनरकौ पुत्रौ जज्ञाते। तयोः द्वयोः द्वे पत्न्यौ मायावेदनात्मकौ जज्ञाते। ततः माया समेषां जीवानां संहारकर्ता मृत्युं असूयत। वेदनाऽपि रौरवेन स्वं पुत्रं दुःखमसूयत। मृत्योः अपि व्याधि-जरा-शोक-तृष्णा-क्रोधादयः जज्ञिरे। एते सर्वे दुःखोत्तराः अधर्मलक्षणाः प्रोक्ताः। नैषां पुत्रोऽस्ति न च भार्या। ते सर्वे उर्ध्वरेतसः। एतानि रूपाणि रौद्राणि भवन्ति, तथा नित्यप्रलयस्य कारणानि वर्तन्ते। परन्तु दक्षमरीचिप्रभृतयः नित्यसर्गस्य कारणं भवन्ति। मनुस्तथा मनुपुत्राः शूर-वीराः राजागणः अस्य प्रपञ्चस्य नित्य-स्थितेः कारणभूताः सन्तः विराजन्ते।

बोधप्रश्नाः –

१. के नित्यप्रलयस्य कारणभूताः ?

२. जराव्याध्यादयः कस्मात् जज्ञिरे ?

## लयस्वरूपम्–

नित्यसर्गस्तथा नित्यस्थितेः प्रसङ्गपूर्वकवर्णनानन्तरं मैत्रेयः पराशरं परिपप्रच्छ हे मुनिश्रेष्ठ ! प्रलयस्य विवरणं ब्रुहि। ततः पराशरः उवाच – सर्वान् सर्गस्थितिविनाशान् कारणहेतवः भगवान् मधुसूदनः रूपैरचिन्त्यैः अव्याहतो करोति। नैमित्तिकप्राकृतिकात्यान्तिकनित्यरूपेण चतुर्विधः प्रलयः सर्वान् नाशयति। एतेषु

नैमित्तिकप्रलयः ब्रह्मणः शयनवेलायां भवति, यत् ब्राह्म-प्रलयरित्युच्यते। प्राकृतिकप्रलये ब्रह्माण्डः प्रकृतौ लीनो भवति। योगिनः परमात्मनि लीनं भवति आत्यान्तिकप्रलयः एवञ्च अहोरात्रं यत् भूतानां विनाशक्षयश्च भवति तत् नित्यप्रलये अन्तर्भवति। सृष्टिविषये एवं वक्तुं शक्यते यत् प्रकृतेः कारणात् महत्तत्त्वादीनां या सृष्टिर्भवति सा प्रकृतिकसृष्टिः उच्यते। अवान्तरप्रलयानन्तरं चराचरजगतः उत्पत्तिर्भवति सा दैनन्दिनी सृष्टि उच्यते। यत्र प्रत्यह्नं जीवानां सृष्टिर्भवति सा नित्यसृष्टिः कथ्यते।

एवंरूपेण समस्तशरीरे विद्यमानः भगवान् विष्णुः अस्य चराचरात्मकस्य जगतः उत्पत्तिस्थितिसंहारस्य मूलकारणमिति नास्ति लेशोऽपिसन्देहस्यावकाशः। सृष्टिस्थितिलयात्मकमियं प्रक्रिया समेषां जीवानां शरीरे अहर्निशमव्याहतं चलति। हे ब्रह्मन! एतत् त्रयं त्रिगुणात्मिका महती वैष्णवी शक्तिर्वर्तते। अतः यः एतान् त्रीन् गुणान् अतियाति सः परमपदं प्राप्नोति, न कदापि पुनरावर्तते।

**बोधप्रश्नाः**

१. प्रलयः कतिविधः ?

२. कः परमपदं प्राप्नोति ?

## रौद्रसृष्टिः –

तामसिकसृष्टे वर्णनानन्तरं रौद्रसृष्टेः वर्णनं ब्रुते। कल्पादौ ब्रह्मा आत्मनस्तुल्यं सुतमेकं प्रध्यायतस्ततः तस्याङ्के नीललोहितवर्णस्य एकः पुत्रः जज्ञे। जन्मनादनन्तरं सः पुत्र सुस्वरेण रुरोद, ततः ब्रह्मा तमुवाच किमर्थं रोदिषि? ततः सः पुत्रः प्रत्युवाच नाम देहीति। ततः ब्रह्मा ब्रबीति रुद्रः तव नाम, इदानीं धैर्यमावह। एवं श्रुत्वा पुनः सः सप्तवारं रुरोद। ततः अन्यानि सप्तनामानि ददौ। तथा तेषां स्थानं-स्त्री-पुत्रादीनां चयनमकार्षीत्। प्रजापतिः तं सुतं भवं, शर्वं, महादेवं, ईशानं पशुपतिं, भीमं, उग्रमित्युक्त्वा सम्बोधितवान्। क्रमशः तस्य मूर्तयः भवन्ति सूर्य-जल-पृथिवी-वायु-अग्नि-आकाश-दीक्षितब्राह्मण-चन्द्रमा-इत्यादयः। रुद्रादि नामभिः सह सुवर्चला,

ऊषा, विकेशी, अपरा, शिवा, स्वाहा, दिशा, दीक्षा, रोहिणी चेति क्रमशः पत्नयः भवन्ति। तेषां पुत्रादयः भवन्ति शनैश्चर-शुक्र-लोहिताङ्ग-मनोजव-स्कन्द-सर्ग-सन्तान-बुध-चेति क्रमशः। भगवान् रुद्रः साक्षात् दक्षस्य अनिन्दिता पुत्रीं सतीं स्वभार्यारूपेण उपयेमे। दक्षकोपकारणात् सती स्वशरीरं तत्याज। ततः हिमाचलस्य पुत्री रूपेण जज्ञे। भगवान् शङ्करः अनन्यपरायणां तां कन्यां जग्राह।

**बोधप्रश्नाः**

**१. कः जन्मनादनन्तरं रुरोद?**

**२. रुद्रस्य पुत्राः के भवन्ति?**

**३. भगवान् शङ्करः कां कन्यां उपयेमे ?**

**भगवती श्रीलक्ष्म्याः सर्वव्यापकता —**

प्राक् पराशरमहर्षिः लक्ष्म्याः जन्मविषये भिन्नमवादीत्। यत् भृगुमहर्षिणा ख्यातिः धाताविधातात्मकौ द्वौ पुत्रौ असूयत। परन्तु एवञ्च श्रुयते यत् सागरमन्थनवेलायां लक्ष्म्याः पादुर्भावः जातः। विषयेऽस्मिन् मैत्रेयः पुनः परिपप्रच्छ। प्रसङ्गवशात् महर्षिः पराशरः तमुवाच हे द्विजोत्तम! नित्यैवैषा विष्णोः श्रीरनपायिनी जगन्माता महालक्ष्मी सर्वगतो वर्तते। यथा विष्णोः सर्वव्यापकत्त्वं सुविदितं तथैव अस्याः अपि सर्वव्यापकत्त्वं विद्योतते। यदि विष्णुः अर्थो वर्तते तर्हि इयं वाणी, हरिः नियमश्चेत् लक्ष्मी नीतिः, भगवान् विष्णुः बोधः एषा बुद्धिः, सः धर्मश्चेत् सा सत्क्रिया वर्तते। भगवान् जगतः स्रष्टा तथा लक्ष्मी सृष्टिः, एकः भूधरश्चेत् अपरा भूमिः, विष्णुः सन्तोषश्चेत् लक्ष्मी नित्यतुष्टिश्च भवति। अनयोः अन्योन्यता एवं वर्तते यथा कामः-इच्छा, यज्ञः-दक्षिणा, पुराडाशः- आज्याहुतिः, हे मैत्रेय! भगवान् यजमानगृहश्चेत् एषा लक्ष्मी पत्नीशाला, एकः यूपश्चेत् अपरा चित्तिः, कुशश्चेत् लक्ष्मी इध्मा, भगवान् सामस्वरूपश्चेत् लक्ष्मी उद्गीतिः।

बोधप्रश्नाः

१. विष्णोः पत्नी का?

२. बुद्धिरूपा का वर्तते ?

## ऋषिदुर्वाससः शापः –

कदाचित् भगवतः महेश्वरस्य अंशावतारः दुर्वासामहर्षिः पृथिवीतले विचचार। सः ऋषिः एकस्याः विद्याधर्याः हस्ते एकां स्रजं ददर्श। सा स्रक् सन्तानकपुष्पाणां दिव्या माला आसीत्। तस्याः मालायाः सुगन्धेन कृत्स्नं वनं वासितमभूत्। तत् वनवासिभिः अतिसेव्यमासीत्। उन्मत्तव्रतधृक् विप्रः तां मालां विद्याधरवधूं ययाचे। सा च विशालाक्षी सादरं प्रणिपत्य तस्मै ददौ। तां मालामादाय सः विप्रः भूमौ परिबभ्राम। ततः सः आयान्तम् ऐरावते स्थितं त्रैलोक्याधिपतिं शचीपतीमिन्द्रं देवैः सह ददर्श। ततः उन्मतवन्मुनिः तां मालां चिक्षेप। सः इन्द्रः तां मालां ऐरावतस्य मूर्ध्नि स्थापितवान्। ततः सः ऐरावतः कैलासपर्वतस्य शिखरोपरि गङ्गासदृशी रराज। मदोन्मत्तः गजोऽपि स्वकरेण आघ्राय तां स्रजं चिक्षेप। ततः भगवान् दुर्वासा मुनिः चुक्रोध। तथा तमिन्द्रं प्रत्युवाच ऐश्वर्येण दूषितः सन् त्वं नाभिनन्दसि। त्वं मया दत्तामिमां मालां न बहुमन्यसे, अतः तव वैभवः विनाशमुपयास्यति। मद्दत्ता माला महीतले त्वया क्षिप्ता, तस्मात् सर्वं शीघ्रं तव नष्टतां यास्यति। त्वं मामतिगर्वेण अवमन्यसे, यं दृष्ट्वा सर्वे भीताः भवन्ति। ततः ब्रह्मर्षिः दुर्वासा इन्द्राय बहु दुर्वचनमब्रवीत्। तदानीम् इन्द्रः दुर्वाससं कोपितं दृष्ट्वा चकितोऽभवत्। दुर्वासा महर्षि कोपवशात् तमिन्द्राय बहु कटुवचनमुक्त्वा निन्दां चक्रे।

ततः शीघ्रं ऐरावततः अवतीर्य त्वरान्वितः तं मुनिं दुर्वाससं प्रसादयामास। ततः ऋषिः तमुवाच नाहं कृपालुहृदयो न च क्षमा मां भजते। गौतमादि ऋषयः वृथा स्तुतिमाचरन्ति, तेन गर्वेण त्वं मामवमन्यसे। हे शतक्रतो ! त्वं किमर्थमनुनयात्मिकां विडम्बनां करोषि, नाहं क्षमिष्ये।

ततः पराशरः उवाच हे ब्रह्मन्! ततः विप्रः तथा ऐरावतमारुह्य इन्द्रः द्वावपि ययातुः। ततः प्रभृति सशक्रं भुवनत्रयस्य श्रीः क्षीणा जाता। तदानीं तापसाः न तपस्यन्ति न च यज्ञाः पुनः समवर्त्तन्त न च दानादिधार्मिकक्रियासु मनः चक्रे। सकलाः लोकाः लोभाद्युपहतेन्द्रियाः अभूवन्। यत्र श्रीः नास्ति तत्र कुतः सत्त्वं। तथा विना सत्त्वं गुणाः अपि कुतः समवर्त्तन्त। ततः दानवाः निःसत्त्वैः देवैः सह युद्धं चक्रुः। अन्तिमपर्याये देवाः पराजिताः सन्तः ब्रह्मणः शरणं ययुः। ततः ब्रह्मा तान् उवाच विष्णोः शरणं व्रजध्वमिति। सर्वेः समवेतः पितामहः श्रीविष्णुं वाग्भिरष्टाभिः तुष्टाव।

बोधप्रश्ना:

१. कः इन्द्राय अभिशापं ददौ ?

२. माला केन पुष्पेन निर्मिता आसीत् ?

३. देवाः कस्य स्तुतिं चक्रुः ?

## समुद्रमन्थनम् —

सर्वे देवाः अमृतप्राप्तिनिमित्तं दैत्यैः सह सन्धिं चक्रुः। देवदानवदैत्यादयः मन्दराचलपर्वतं संस्थाप्य वासुकिसहायेन मथितुमारब्धं चक्रुः। यतः पुच्छभागे देवाः तथा मुखप्रदेशे दैत्याः निवेशिताः। तस्य सर्पस्य मुखनिश्वासाग्नौ निस्तेजसोऽसुराः बभूवुः। ततः पुच्छप्रदेशे सुराः वलान्विताः बभूवुः। हे ब्रह्मन्! साक्षात् नारायणः श्रीविष्णुः कूर्मरूपं धृत्वा मन्दराचलस्याधारोऽभूत्।

ततः देवदानवैः मथ्यमाने तस्मिन् क्षीराब्धौ सुरपूजिता कामधेनुः सुरभिः जज्ञे। ततः मदाघूर्णितलोचना वारुणी देवी आगता। ततः कल्पवृक्षः परिजातोऽभूत्। ततः चाप्सरसां गणः समुत्पन्नः। ततः शीतांशुः अभवत्। हलाहलस्य विषं जगृहुः। श्वेतवस्त्रधारी साक्षात् नारायणः धन्वन्तरिर्देवः अमृतस्य कमण्डलुं धृत्वा समुत्थितः।

तस्मात् क्षीरसागरात् विकशितकमले स्थिता लक्ष्मीः धृतपङ्कजा समुत्पन्ना। तदानीं सर्वे महर्षयः श्रीसूक्तस्य गानं तथा विश्वावस्वादयः गन्धर्वाः गानं चक्रुः। ततः साक्षात् गङ्गा समुत्पन्ना जाता। एतादृशं वस्त्रं धृत्वा, दिव्यजलेन स्नात्वा, दिव्याभूषणैः शोभिता सती श्रीलक्ष्मीः हरेः वक्षप्रदेशं जगाम।

बोधप्रश्ना:

१. वासुकिसर्पस्य मुखप्रदेशे के आसन् ?

२. लक्ष्मीः कस्मात् आजगाम ?

३. कामधेनुः का ?

## सारांश: –

अविद्यादीनां भेदान् प्रतिपाद्य नवविधानां सर्गाणां वर्णनं पुर:सरं ब्रह्मण: सकाशात् मरीच्यादीनाम् ऋषीणाम् उत्पत्ति: प्रतिपादिता वर्तते। अस्मिन् अध्याये मरीचे: पुत्राणां वर्णनं तथा पुरणालक्षणानुसारं वंशनां विवरणं प्रतिपादितम्। ब्रह्मण: मानसपुत्राणां सनकसनन्दसनातनादीनां ब्रह्मचर्यपूर्वकं तपस्याविषया: श्रुयन्ते। तथा सृष्टिप्रक्रियाविषयकं विवरणं प्रतिपादितमत्र। विशेषरूपेण लक्ष्म्या: सर्वव्यापकता प्रतिपादिता। पृथिव्यां यथा विष्णु: सर्वत्र सर्वस्मिन् हृदि च निवसति तथैव लक्ष्म्या: सत्ता अपि तेन विष्णुना सह सर्वत्र दृश्यते इति समुपवर्णितं वर्तते। जगत: सर्वत्र लक्ष्म्या: सर्वव्यापकता वर्णिता । महर्षि: दुर्वासस: इन्द्राय शापादि विषया: तथा सन्तानकपुष्पस्य मालायां विषये प्रतिपादितम्। दुर्वासस: शाप: सर्वेषां देवानां तथा दैवलोके स्थितानां समेषां उपरि पतित:। सर्वे च देवा: विष्णो: शरणं प्रति गत्वा स्तुतिं कुर्वन्त: स्वाभिप्रायं प्रोचु:। देवाधिदेवस्य श्रीविष्णो: अभयदानप्रसङ्ग: समुपवर्णितो दृश्यते। श्रीविष्णु: देवान् सर्वान् समुद्रमथनस्य परामर्शं कृत्वा दानावानां सहायेन समुद्रमथनं कृत्वा अमृतं निस्सारयितुमादिदेश। देवदानवयो: समुद्रमथनं तथा तस्मात् समेषां गजधेनुलक्ष्म्यादीनां प्रादुर्भावो प्रतिपादित:। मन्दराचलपर्वतं धृत्वा कच्छपरूपेण भगवत: अवतारप्रसङ्ग: प्रतिपादित:। दानवानां नागस्य पुरत: विराजमाने सति नि:श्रीकता प्रतिपादिता।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः

१. मरीच्यादीनामाविर्भावः ?

२. लक्ष्म्याः सर्वव्यापकत्त्वम् ?

३. लक्ष्मीः इन्द्राय वरप्रदानम् ?

## विश्लेषणात्मकप्रश्नाः

१. प्रलयस्वरूपं विशदयत ।

२. लक्ष्म्याः आविर्भावं प्रतिपादयत ।

३. रौद्रसृष्टेः स्वरूपं लिखत ।

## निबन्धात्मकप्रश्नाः

१. दुर्वाससा इन्द्राय प्रदत्तस्य श्रापस्य कारणं प्रतिपाद्य देवदानवयोः युद्धं वर्णयत ।

२. समुद्रमथनं स्पष्टयत।

## एकाङ्कप्रश्नाः

१. सनकः कस्य पुत्रः ?

२. रुद्रः कस्मात् जज्ञे ?

३. लक्ष्मी कुत्र निवसति ?

४. दुर्वासा कस्मै श्रापं ददौ ?

५. माला कस्य पुष्पस्य सुगन्धेन वासिता ?

६. प्रलयः कतिविधः ?

७. के निःश्रीकाः अभूवन् ?

८. कामधेनुः का ?

९. लक्ष्मीः कस्मादाजगाम ?

१०. देवाः समुद्रमथनात् किं प्राप्तवन्तः ?

११. ब्राह्मप्रलयस्य नामान्तरं किम् ?

## उत्तराणि –

१.  ब्रह्मणः  २. ब्रह्मणः ध्यानात् ३ .विष्णोः वक्षस्थले ४.  इन्द्राय  ५. सन्तानकस्य  ६. चतुर्विधः

७. दानवाः  ८.  सुरभिः  ९. समुद्रमथनात् १०. अमृतम्  ११. नैमितिकलयः १२

# चतुर्थोऽध्याय:

## प्रस्तावना

पुराणस्यलक्षणकथनावसरे वंशवंशानुचरितवर्णनं प्रमुखवैशिष्ट्यं भजते। समेषां ऋषीणां तथा तेषां सन्ततीनां प्रसङ्ग: पुराणसाहित्यस्य विस्तृततां सदैवमुपैति। प्रसङ्गेऽस्मिन् ध्रुवस्य चरितं यथा प्रतिपादितं तदन्यत्र न विद्योतते। तपस्या: फलं निरूप्य पृथिव्यां तस्या: माहात्म्यं प्रतिपादितं वर्तते। तथा पूर्वजन्मनि ध्रुवस्य चरितमपि दरीदृश्यते। अध्यायेऽस्मिन् भगवत: नामसङ्कीर्तनस्य तथा महामन्त्रस्य वर्णनं महत्वैशिष्ट्यतामुपैति। तन्नाममन्त्रस्य माहात्म्यं समुपवर्णितं वर्तते

## उद्देश्यानि —

प्रिय पाठका: ! अध्यायेऽस्मिन् अधोलिखितान् विन्दूनुपरि पठिष्यन्ति।

- भृग्वग्न्यादीनां सन्ततय: –
- ध्रुवस्य ग्लानि: –
- ध्रुवस्य वनगमनम् –
- मुनीनां ध्रुवाय उपदेश –
- ध्रुवस्य तपस: प्रभाव: –
- श्रीविष्णो: आराधनाविधि: —
- ध्रुवचरितस्य श्रवणफलम् –

## भृग्वग्न्यादीनां सन्ततयः –

मैत्रेयः पूर्वं भृगोः चरितं श्रुत्वा तस्य सन्तानानां विशद् विवरणं प्रस्तोतुं मुनिश्रेष्ठाय पराशराय पप्रच्छ। ततः भृगोः सन्तानतः सकलसृष्टेः वर्णनं ब्रुहि। पराशरः ब्रुते – हे ब्रह्मन्! भृगोः सकाशात् ख्यात्यां विष्णुपत्नी लक्ष्मीः जज्ञे, तथा धाताविधाताख्यौ द्वौ पुत्रौ बभूवतुः। एतौ द्वावपि महात्मामेरोः कन्ये अयातिर्नियातिभ्यां सह परिणयं चकार। ततः प्राणमृकण्डुख्यौ द्वौ पुत्रौ बभूवतुः। मृकण्डुतः मार्कण्डेयस्तथा तस्मात् वेदशिरः जज्ञे। इदानीं प्राणस्य सन्तानानि उच्यन्ते – प्राणस्य पुत्रः द्युतिमान्, तस्मात् जातः राजवान्। ततः राजवतः भृगुवंशस्य विस्तारमभूत्।

मरीच्याः पत्नी सम्भूतिः पौर्णमासम् असूयत। ततः पौर्णमासतः विरजापर्वताख्यौ द्वौ जज्ञिरे। एतस्य भृगोः वंशसङ्कीर्तने पुत्रानहं वदिष्ये। अङ्गिरसः पत्नी स्मृतिः, एतस्याः सिनीवाली, कुहुः, राका, अनुमतिश्च क्रमशः चतस्रः कन्यकाः जज्ञिरे। अत्रेः पत्नी अनसूया चन्द्रमसं–दुर्वाससं-दत्तात्रेयं च असूयत। ततः पुलस्त्यस्य पत्नी प्रीतितः दत्तोलिका जज्ञे, या पूर्वस्मिन् कल्पे अगस्त्यनाम्ना प्रथितः बभूव। प्रजापतिपुलहस्य भार्याक्षमायाः कर्दम-उर्वरीयान्-सहिष्ण्वाख्याः त्रयः पुत्राः जज्ञिरे।

ततः क्रतोः पत्नी सन्ततिः षष्टिसहस्राणि वालखिल्यान् ज्वलद्भास्करसदृशान् पुत्रान् असूयत। एते सर्वेऽपि पुत्राः ऊध्वरेतसः मुनयः आसन्। वसिष्ठस्य ऊर्जानाम्नी पत्नीतः रज-गोत्र-ऊर्ध्वबाहु-सवन-अनघ-सुतपा-शुक्रादयः सप्तपुत्राः जज्ञिरे। एते पुत्राः निर्मलस्वभावयुक्ताः सप्तर्षयः आसन्। हे द्विज! अग्न्यभिमानी देवः, (यः ब्रह्मणः ज्येष्ठपुत्रः) तस्य स्वाहानाम्नी पत्नी पावक-पवमान-शुच्याख्याः त्रयः पुत्राः बभूवुः। एतेषां त्रयाणां पुत्राणां पुनः ४५ पुत्राः अभवन्। पुनः स्वधातः मेनाधारिण्यौ द्वे कन्ये जज्ञाते। एते द्वे कन्ये योगिनिब्रह्मवादिन्यौ।

बोधप्रश्नाः

१. अग्न्यभिमानिदेवस्य पत्नी का ?

२. मरीच्याः पत्नी का?

३. के द्वे ब्रह्मवादिन्यौ कन्ये ?

## ध्रुवस्य ग्लानिः –

मैत्रेयस्य परिप्रश्नेन महर्षिः पराशरः उवाच हे ब्रह्मन! प्राक् मया स्वायम्भुवमनोः प्रियव्रतोत्तानपादाख्यौ द्वौ पुत्रौ कथितौ। ततः उत्तानपादस्य पत्नी सुरुचिः उत्तमाख्यं पुत्रमसूयत। तस्य राज्ञः नातिप्रियायाः सुनीत्याः पुत्रो वर्तते ध्रुवः। ततः कदाचित् ध्रुवः राजसिंहासने स्वभ्रातरं पितुः अङ्के दृष्ट्वा तमारोढुं इयेष। परन्तु राजा सुरुच्याः सम्मुखे प्रणयेनागतं पुत्रं नाभिनन्दत। ततः तथारूढ़ं ध्रुवं दृष्ट्वा सुरुचिः उवाच एतद्राजसिंहासनं सर्वभूभृत्संश्रयकेतनं योग्यं, न तव किमर्थं वृथा क्लिश्यते।

ततः पितरं उत्सृज्य स्वमातरं प्रति जगाम। तं पुत्रं दृष्ट्वा प्रस्फुरितेन माता पप्रच्छ – कः तव कोपहेतुः। कः त्वां नाभिनन्दति? सकलं वृतान्तं मात्रे ध्रुवः कथयामस। ततः सुनीतिः अब्रवीत् सुरुच्याः कथनं युक्तं, यत् पूर्वं निश्चितं तत् कोऽपहर्तुं शक्नोति। ततः दुःखं न कर्तव्यम्। पूर्वजन्मनः पुण्यादेव राजासनं लभ्यते। तस्याः सुरुच्याः पुत्रः अतिपुण्यवान् वर्तते। यदि सुरुच्याः वचसा असन्तुष्टः तर्हि पुण्यं कुरु। ततः ध्रुवः उवाच- हे अम्ब!यत् त्वं मम क्रोधप्रशमाय वचः प्रात्थ तत् मम हृदये न क्षणमपि तिष्ठति। तदर्थमहं सर्वोत्तमोत्तमं स्थानं प्राप्तुं यतिष्यामि। अहं तत्पदं नाभीप्सामि स्वकर्मणा लब्धं स्थानं प्रति जिगमिषामि।

**बोधप्रश्नाः –**

१. ध्रुवस्य मातुः नाम किम्?

२. कुत्र उपवेष्टुं ध्रवः इयेष?

## ध्रुवस्य वनगमनम् –

ध्रुवः ततः मातरमेतादृशं वाक्यं उक्त्वा ततस्तद्वाह्योपवनं ययौ। ततः सः कृष्णाजिनोत्तरीयेषु विष्टरेषु समस्थितान् ऋषीन् ददर्श। तान् अभिवादनं कृत्वा उवाच अत्मग्लानिकारणतः प्रस्थितः। इदानीं चतुःपञ्चाब्दसम्भूतो बालः त्वं, किं तव निर्वेदस्य कारणम्। तव पिता भूपतिः, नचैव किञ्चिदपि इष्टवियोगादि दुःखं वर्तते, शरीरे न व्याधिः परिलक्ष्यते। किं तव निर्वेदस्य कारणम्?

ततः ध्रुवः कथयामास सुरुच्याः वचनमुदाहृतम्। ततः तन्निशम्य मुनयः परस्परं प्रोचुः - अक्षमाकारणतः बालकस्यापि विमातुरुक्तं नापसर्पति। किं सहायं कर्तुं अस्माभिः शक्यते तदुच्यताम्। ततः ध्रुवः कथयामास भो द्विजसत्तमाः! अहं न राज्यं धनं चाभीप्सामि, अहं तत्स्थानमभीप्सामि यत् न केनचित् पुरा भुक्तम्। तत् प्राप्तुमुपायं ब्रुहि।

बोधप्रश्नाः –

१. सुरुची का वर्तते ?

२. ध्रुवः कैः सह वार्तालपमकार्षीत्?

## मुनीनां ध्रुवाय उपदेश –

ततः मरीचिः कथयामास हे सुत! तत्स्थानं गोविन्दाराधनानन्तरं प्राप्तुं शक्यते। तस्मात् त्वं गोविन्दं भज। ततः अत्रिः अब्रवीत् परमपुरुषस्य जनार्दनस्य सन्तुष्टिः यस्मिन् वर्तते स एव तत्स्थानं लब्धुं शक्नोति। अङ्गिरा उवाच – सर्वमेतद् जगत् भगवति अच्युते लीनः अतः तमाराधय। पुलस्त्य उवाच यः परब्रह्म-परमपुरुषं ध्यायति सः तमाराध्य परमगतिं याति। ततः पुलह कथयामास – हे सुव्रत! यमाराध्य इन्द्रादिदेवाः परं स्थानं जग्मुः तमाराधय। क्रतुः अब्रवीत् तं यज्ञपुरुषं समाराध्य सर्वे यदप्राप्यं तमपि प्राप्नुवन्ति।

**श्रीविष्णोः आराधनाविधिः —**

श्रीविष्णुरेव साक्षात् परब्रह्म परमपुरुषरिति द्विजाः ध्रुवं प्रति प्रोचुः। तस्यैव आराधनायां सर्वं संसारगतं दुःखं नश्यति परमपदं तथा इष्टानां समेषामुपलब्धिर्भवति। ततः वसिष्ठः तमुवाच हे वत्स! तस्याराधनानन्तरं मनसा यद्यदिच्छसि तत्सर्वं प्राप्नोषि। ततः ध्रुवः किं जप्तव्यं मया तत् भवद्भिरेव उच्यताम्। पुनः ऋषयः ऊचुः भगवतः श्रीविष्णोः आराधना यथा कार्या तत् अस्माभिः उच्यते। मनुष्यः बाह्यविषयेभ्यः चित्तं सर्वदा त्याज्ययेदिति । केवलं तमेव जगदाधारं श्रीविष्णोः सङ्कीर्तनं कुर्वीत। एकाग्रचित्तेन तन्मयेन तस्य मन्त्रस्य अहर्निशं जपः कर्तव्यः। **ॐ नमो भगवते वासुदेवाय** इति महामन्त्रं सदा स्मरणं करणीयम्। पितामहस्तथा स्वायम्भुवमनुः एनं मन्त्रं

जजाप। ततः त्रैलोक्यदुर्लभां सिद्धिं तथाभिलषितं वस्तु गोविन्दः तस्मै ददौ। तदवत् त्वमपि एतस्य महामन्त्रस्य जपं कुरु।

**बोधप्रश्नाः –**

१. विष्णोः द्वादशाक्षरमन्त्रः कः ?

२. कः विष्णोः आराधनाविधिं श्रावयामास ?

## ध्रुवस्य तपसः प्रभावः –

ध्रुवः मधुवने अत्यन्तं कठोरं तपः आचचार। ध्रुवस्य तपः न केवलं धरापृष्ठे अपितु सकलप्रपञ्चे अद्वितीयम्। अनन्यचेतसा ध्रुवः हरिं ध्यायतः सः सर्वभावगतोऽभवत्। तस्य मनसि केवलं हरेः आरधनातिरिच्य न किमपि अन्यत् बभूव। हे मैत्रेय! ध्रुवस्य भारमुद्वोढुं भूतधारिणी पृथिवी अपि न शशाक। ध्रुवस्य वामपादस्थिते मेदिन्याः अर्द्धं वामपार्श्वं प्रति अपान्यस्यत। तद्वत् दक्षिणतः अपि। यदा सः पादाङ्गुष्ठेन भूमौ स्थितः तदा समस्ता वसुधा पर्वतैः सह चचाल। नद-नदी-समुद्रादयः संक्षोभं ययुः। इन्द्रेण साकं देवगणाः तस्य तपः भग्नार्थं आजग्मुः। कूष्माण्डादयः उपदेवाः अपि नानारूपं धृत्वा समाधिभग्नार्थं प्रयासं चक्रुः।

**ध्रुवस्य मातुः आगमनम् –**

यदा ध्रुवं माता वने घोरसमाधौ दृष्ट्वा करुणां वाचमाह – बहुभिः मनोरथैः मया लब्धः पुत्रः । एतस्मिन् निवर्तस्व। इदानीं भवतः क्रीडाकालः विद्यते, एतादृशं दारुणं तपः आचरितु कथं शक्यते। अस्मिन् वने बहवः राक्षसाः विद्यन्ते, निवर्तस्व। स्वस्य सर्वनाशं मा कुरु।

एतादृशं वचनं श्रुत्वाऽपि मनसि विष्णुं ध्यायन् सः प्रलापवतीं वाष्पकुलविलोचनां मातरं पश्यन्नपि न ददर्श। एनं भक्ष्यतां हन्यतां छिद्यतामिति निशाचराः घोररवं चक्रुः। परन्तु भगवति आसक्तः ध्रुवः एकाग्रचित्तेन हरिनाममृतं जजाप।

**बोधप्रश्नाः —**

१. ध्रुवस्य भारं वोढुं का न शशाक?

२. के संक्षोभं ययुः?

## ध्रुवाय भगवतः वरदानम् –

ध्रुवस्य तपसा सन्तुष्टः भगवान् नारायणः तस्य पुरतः साक्षात् आजगाम। ततः भगवान् ब्रुते- हे ध्रुव! भवतः तपस्या सफलं बभूव। मद्दर्शनं कदाचित् निष्फलतां न याति। तदर्थं वरं वरय यथाभिलषितम्। ध्रुवः अवादीत् हे भूतभव्येश्वर! सर्वान्तर्यामी जगदीश्वरः भवान् सर्वं जानाति। त्वत्प्रसादात् मघवानपि त्रैलोक्यं त्वत्प्रसादफलं भुङ्क्ते। प्रभो त्वत्प्रसादात् सर्वेषामुत्तमोत्तमं स्थानमहं याचे।

ततः भगवान् नारायणः तस्मै वरं ददौ। सूर्य-भौम-तारागणः यत्र तिष्ठन्ति तदुपरि लोकं ददौ। तथा यत् सम्पूर्णदेवगणसप्तर्षीणामपि दुर्लभं वर्तते। केचन चतुर्युगं यावत् तिष्ठन्ति केचन सहस्रयुगं यावत् परन्तु भवान् एकमन्वन्तरं यावत् तत्रैव निवत्स्यति।

ये च मानवाः प्रातः सायं सुसमाहिताः कीर्त्तयिष्यन्ति तेषां महत्पुण्यफलं भविष्यति। तव माता अपि तारारूपेण तावत् पर्यन्तं स्थास्यति।

बोधप्रश्नाः –

१. के महत्फलं प्राप्नुवन्ति?

२. ध्रुवः कं लोकं प्राप्तवान्?

## ध्रुवस्य पूर्वजन्मकथनम् –

ततः श्रीभगवान् उवाच हे बालक! पूर्वजन्मन्यपि त्वयि अहं सन्तुष्टः। त्वं पूर्वजन्मनि ब्राह्मणः एकाग्रमतिः आसीः। मयि निरन्तरेकाग्रचेतसा भक्तिः आसीत्। मातृपितृशुश्रूषुः निजधर्मानुपालकश्च आसीत्। कालान्तरे एकः राजपुत्रः तव अभवत्। सः राजपुत्रः यौवनावस्थायां सम्पूर्णभोगाढ्यः दर्शनीयोज्ज्वलाकृतिः आसीत्। तदानीं तामृद्धिमवलोक्य भवतः अपि वाञ्छा आसीत्। अतः भवान् स्वायम्भुवमनोः कुले दुर्लभं जन्म प्राप्तवान्।

## ध्रुवचरितस्य श्रवणफलम् –

पराशरः इत्थं वर्णयित्वा अस्य श्रवणस्य महाफलमपि कथयामास। कीदृशं तपः आचरितं तेन, येन यदेनं पुरतः कृत्वा सप्तर्षयः स्थिताः। प्रपञ्चेऽस्मिन् तादृशः कोऽस्ति यत् अस्य महिमा वर्णयितु शक्नोति।

यः मानवः ध्रुवस्य एनं दिव्यलोकप्राप्तिप्रसङ्गं कीर्तयेन्नित्यं सोऽपि सर्वपापात् विमुक्तो भूत्वा स्वर्गलोके महीयते। सः स्वर्गे भवतु अथवा पृथिव्यां, कदाचिदपि स्थानच्युतः न भविष्यति। सर्वविधकल्याणयुक्तः सन् दीर्घकालं यावत् जीवति।

| |
|---|
| बोधप्रश्नाः — |
| १. पूर्वजन्मनि ध्रुवः कः आसीत्? |
| २. कस्य स्मरणेन चिन्तनेन च मानवाः न पुनरावर्तन्ते? |

## सारांशः –

वंशवंशानुचरितवर्णनप्रसङ्गे सर्वेषु शास्त्रेषु पुराणशास्त्रं स्वतन्त्रं तथा अद्वितीयं स्थानमलङ्करोति। यत्र समेषां वंशादिक्रमः समुपवर्णितो वर्तते। मरीचिभृग्वादीनां ऋषीणां वंशानुचरितं तथा वर्णनप्रसङ्गे महतां समेषां चरितानां वर्णनं श्रुयते। अध्यायेऽस्मिन् महर्षेः भृगोः वंशवर्णनं प्रतिपादितम्। प्रसङ्गवशात् ध्रुवस्य चरितं सुष्टुप्रतिपादितम्। यत्र भगवद्भक्तितत्त्वस्य पराकाष्ठा परिदृश्यते। भगवतः श्रीविष्णोः परमभक्तस्य ध्रुवस्य नाम संसारे अविस्मरणीयमभूत्। विष्णोः द्वादशाक्षरस्य मन्त्रस्य मनने तादृशः लग्नः अभवत् यत् स्वमातरमपि न अपश्यत्। भगवतः गुणनामसङ्कीर्तने लीनो भूत्वा साक्षात् ध्रुवस्य भारः एतादृशः जातः येन पृथिवी तस्य ध्रुवस्य भारं सोढुं न अशक्नोत्। देवदानवगन्धर्वाः सर्वेऽपि प्रभाविताः बभूवुः। ध्रुवस्य माता समागम्य तपस्यातः निवारयितुं बहु चेष्टां कृत्वा विफलतां प्राप्तवती। ध्रुवस्य भगवत्स्तुत्या साक्षात् विष्णुः तत्र आविर्भुतः बभूव। तस्मै यथोचितं वरं ददौ। ध्रुवस्य पूर्वजन्मनः विषये अपि तं स्मारितवान्। ततः ध्रुवाख्यस्य चरितस्य महाफलस्य विषये समुपवर्णितम्।

# आदर्शप्रश्ना:

## लघूत्तरीयप्रश्ना: –

१. ध्रुवचरित्रस्य श्रवणफलम्।

२. ध्रुवस्य पूर्वजन्मविषये लिखत।

३. पुराणानां लक्षणानि लिखत।

## विश्लेषणात्मकप्रश्ना: –

१. ध्रुवस्य तपस: प्रभावं स्पष्टयत।

२. ध्रुवस्य ग्लानिं प्रतिपादयत।

३. द्विजानामुपदेशं विशदयत।

## निबन्धत्मकप्रश्ना: –

१. भृगो: वंशं विशदयत।

२. ध्रुवस्य भगवद्भक्तिं स्पष्टीकुरुत।

## एकाङ्कप्रश्ना: –

१. ध्रुवस्य मातु: नाम किम् ?

२. ख्याताया: पुत्री का ?

३. वेदशिरस्य पिता क: ?

४. द्युतिमान् कस्य पुत्रो वर्तते ?

५. के ध्रुवाय उपदेशं ददौ ?

६. का तारा रूपेण तिष्ठति ?

७. पूर्वजन्मनि ध्रुव: क: आसीत् ?

८. क: पूर्वजन्मवृतान्तं श्रावयामास ?

९. पुराणास्य कतिलक्षणानि वर्तन्ते ?

१०. पुलहस्य भार्या का ?

११. वसिष्ठस्य कति पुत्रा: आसन् ?

१२. मार्कण्डेयस्य पिता कः ?

१३. अङ्गिरससः कति कन्यकाः जज्ञिरे ?

**उत्तराणि —**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १. | सुनीतिः | २. | लक्ष्मीः | ३. | मार्कण्डेयः | ४. | प्राणस्य |
| ५. | द्विजाः | ६. | सुनीतिः | ७. | ब्राह्मणः | ८. | विष्णुः |
| ९. | पञ्चलक्षणानि | १०. | क्षमा | ११. | सप्त | १२. | मृकण्डुः |
| १३. | चतस्रः | | | | | | |

# पञ्चमोऽध्याय:

## प्रस्तावना–

अध्यायेऽस्मिन् विविधानां ऋषिवंशानां विषये आलोचयिष्यते। ध्रुवस्य पुत्रादीनां चरितं तथा तेषां वंशानुचरितं अत्र सम्यक् प्रतिपाद्यते। राजवेन: तथा पृथो आख्यानं तत् चरित्रश्रवणस्य महापुण्यफलादिकं अध्यायेऽस्मिन् सुष्टु प्रतिपाद्यते। पृथो पुत्रादीनां वर्णनं प्रचेतसां चरित्रचित्रणं नित्यनूतनतां मार्मीकतामुपैति च। प्रचेतसां समुद्रे तप: वर्णनं प्राचीनबर्हिचरित्रं ग्रन्थस्यास्य वैशिष्ट्यमावहति। प्रचेतसां मारिषाभि सह विवाहस्तथा दक्षप्रजापते: उत्पत्ति: तस्य अष्टकन्यानां वर्णनं अध्यायेऽस्मिन् प्रतिपाद्यते।

## उद्देश्यम् –

प्रिय पाठका:! भवन्त: सर्वे अस्मिन् अध्याये एतान् विन्दून् पठिष्यन्ति।

- वेनचरितम्
- पृथुचरितम्
- श्रवणफलम्
- बर्है: चरितम्
- प्रचेतसां भगवदाराधनम्
- प्रचेतसां विवाह:
- दक्षप्रजापते: उत्पत्ति:

## वेनचरितम् —

पराशरः मैत्रेयं प्रति ध्रुवस्य भगवदाराधनादिकं प्रतिपाद्य तस्य महाफलप्राप्तेः सर्वं वृतान्तमश्रावयत्। ततः ध्रुवस्य पुत्रादीनामपि चित्रणमकार्षीत्। अस्य ध्रुवस्य शिष्टिस्तथाभव्याख्यौ द्वौ पुत्रौ बभूवतुः। भव्यतः शम्भोः जन्म बभूव। शिष्टितः रिपु-धनञ्जय-विप्र-वृकल-वृकतेजाख्याः पञ्चपुत्राः जज्ञिरे। रिपोः पत्नी बृहती चाक्षुषमसूयत। अयं चाक्षुषः वरुणकुलोद्भवं वीरणप्रजापतेः पुत्रीं पुष्करणीं जगृहे। ततः मनोः आविर्भावः जातः, यः षष्ठमन्वन्तरस्य अधिपतिः भवति। ततः कुरु-पुरु-शतद्युम्न-तपस्वी-सत्यवान्-शुचि-अग्निष्टोम-अतिरात्र-अभिमन्यु-सुद्युम्नाख्याः दशपुत्राः जज्ञिरे। कुरोः पत्नी आग्नेयी अङ्ग-सुमना-ख्याति-क्रतु-अङ्गिरा-शिवीत्यादीन् षड्पुत्रान् असूयत। अस्मादेव अङ्गात् वेनः जज्ञे।

प्रजार्थमृषयः सर्वे वेनस्य दक्षिणकरं ममन्थुः। तस्मात् वैन्यो नाम महीपालः सम्बभूव, यः पृथुः नाम्ना परिकिर्त्तीतः। यदा वेनः परमर्षिभिः राज्ये अभिषिक्तः तदा सः आत्मानं पृथिवीपतिरिति घोषयामास। सः एव साक्षात् वेनः न यष्टव्यं, न दातव्यं, न होतव्यं च कथञ्चिदिति अब्रवीत्। ततः ऋषयः तं परामर्शमूचुः। यस्मिन् राष्ट्रे यज्ञः क्रियते तत्र श्रीबृद्धिः जायते। तत्फलमपि भवान् प्राप्स्यति। ततः वेनः उवाच मत्तः कोऽभ्याधिकः अन्योऽस्ति, कश्च आराध्यो वर्तते। सर्वे ब्रह्मा-जनार्दन-शम्भुरिश-वायु-रवि-हुतभुग्वरुणादयः राज्ञः शरीरे तिष्ठन्ति, अतः हे ब्रह्मन्! यद् मयाज्ञप्तं तत् क्रियताम्। भर्तृशुश्रूषणं यथा स्त्रीणां धर्मः तथैव ममाज्ञापालनं द्विजानां धर्मो भवतीति।

बोधप्रश्नाः –

१. वेनस्य पितुः नाम किम्?

२. ध्रुवस्य द्वौ पुत्रौ कौ ?

## निषादानाम् उत्पत्तिः

परमर्षिभिः पुनः पुनः यागयज्ञाद्यनुष्ठापयितुं प्रोक्तः। ततः ते सर्वे मुनयः कोपामर्षसमन्विताः सन्तः हन्यतां हन्यतां पापम् इति ऊचुः। यः यज्ञपुरुषं विष्णुं निन्दति न सः भुवनस्य पतिः भवितुं योग्यो भवति। ततः ऋषयः

मन्त्रपूतैः कुशैः तं नृपं निर्जघ्नुः। अनन्तरं सर्वे मुनयः सर्वतो रेणुं ददृशुस्तथा किमिति पप्रच्छुः। नृपं विना राज्ये चौराः सर्वत्र जनानां लुण्ठनमकार्षीषुः। ततः सम्मन्त्र्य मुनयः पुत्रप्राप्त्यर्थं भूभृतः ऊरुं ममन्थुः। तस्मात् मथ्यमानात् किलः पुरुषरेकः दग्धस्थूणाप्रतीकाशः खर्व्वाटः तस्थौ। सः चातुरः किं करोमीति तान् सर्वान् ऋषीन् पप्रच्छ। ततः ऋषयः ब्रुते निषिद । ततः तस्य नाम निषादरिति बभूव। ततः विन्ध्यशैलनिवासिनः निषादाः जज्ञिरे।

| |
|---|
| बोधप्रश्नाः<br>१. मुनयः कं निर्जघ्नुः ?<br><br>२. निषादः कस्माद् आगतः ? |

## पृथोः चरितम्–

निषादानामुत्पन्नानन्तरं पुनः ते च मुनयः वेनस्य दक्षिणकरं ममन्थुः। ततः मथ्यमाने परमप्रतापवान् पुत्रः पृथुः जज्ञे। तस्मिन् समये आजगव नाम धनुः आकाशात् पपात। नभसः दिव्यः शरः चापि पपात। तस्य पुत्रस्य जन्मनादनन्तरं सर्वाणि भूतानि प्रहृष्टानि बभूवुः। राज्ञः पृथोः अभिषिकार्थं सर्वे नदसमुद्रादयः रत्नं धृत्वा आजग्मुः। साक्षात् देवैः सह ब्रह्मा तत्रागम्य वैन्यस्य अभिषेकं चकार। तस्य पृथोः दक्षिणहस्ते चक्रचिह्नं दृष्ट्वा सर्वे विष्णोरंशः इति ज्ञातवन्तः। सः पित्राऽपरञ्जिताः प्रजाः पुनः परितुतोष। पृथोः ध्वजः कदाचिदपि भग्नतां न ययौ।

ततः पृथोः पितामहयज्ञात् सोमाभिषवकाले एकः सूतः जज्ञे। पुनः ततः मागधः जज्ञे। मुनिवरैः उभौ सूतमागधौ प्रोक्तौ, पृथुः स्तूयताम्। ततः पृथोः गुणकीर्तनादिकर्म ताभ्यां द्वाभ्यां कृतम्। सः नृपः पृथुः परमदानशीलः सत्यवादी, क्षमाशीलः, विक्रान्तदुष्टनाशनः, सत्यसन्धश्चासीत्। तथा परमधर्मज्ञः, कृतज्ञः, दयावान्, प्रियभाषक,मान्यान्मानयिता चापि आसीत्। सः अतिसुखेन पृथिवीं पालयामास। तदानीं प्रजाः सर्वे सुखेन बभूवुः। पृथोः सकाशात् सर्वे प्रजाः सुखेन जीवनयापनं चक्रे। इतिहासे पृथो आविर्भावः न केवलं प्रजानां कृते भाविनृपाणां कृते तस्य कर्त्तव्यपालनमवश्यं प्रबोधयिष्यति।

बोधप्रश्नाः –

१. पृथोः पितुः नाम किम्?

२. वेनं के अभिशापं दत्तवन्तः?

## पृथोः पृथ्वीदोहनम्

यदा पृथुः पृथिवीं पालयन् विविधान् यज्ञान् इयाज, तदा प्रजाः क्षुधार्दिताःसन्तः पृथोः समीपे उपतस्थुः। ततः प्रजानामागमनकारणं विज्ञाय पृथुः स्वस्य आजगवं दिव्य धनुः धृत्वा पृथिवीमन्वधावत्। पृथिवी तदानीं गोरूपं धृत्वा सकलसंसारं ब्रह्मलोकं च बभ्राम। यत्र पृथिवी ययौ तत्रापि वैन्यं सायुधं ददर्श। प्रवेपमाना तद्बाणपरित्राणपरायणा वसुधा पृथुं तथा पृथुपराक्रमं दृष्ट्वा प्राह– स्त्रीवधे महापापं किं त्वं न पश्यति? ततः राजा पृथुः उवाच बहूनां क्षेमः यस्य एकस्य निधने भवति तत् पुण्यप्रदकार्यमवश्यं करणीयम्। ततः पृथिवी अब्रवीत् यदि त्वं मां हनिष्यति तर्हि प्रजानां धारणं कः करिष्यति। एतच्छ्रुत्वा सः पृथुः आह अहमेव स्वतपसा सर्वाः प्रजाः धारणं करिष्यामि। पृथिवी तं भूयः प्रणम्य तं नृपं प्राह समस्ता याः सर्वाः महौषधीः मया जीर्णा कृताः, ताः दुग्धरूपेण प्रदास्यामि। अतः प्रजानां हितार्थाय त्वं वत्सं कुरुष्व। तथा च सर्वत्र समां च कुरु येन क्षीरं सर्वत्र समन्ततः भविष्यति। पृथुः शतसहस्रशः पर्वतान् उत्सारयामास । तत् पूर्वं धरातले सस्यानि गोरक्ष्यं कृषिः वणिकपथः आसीत्। पृथुः स्वायम्भुवं वत्सं कल्पयित्वा स्वपणौ पृथिवीं दुदोह। ततः सर्वाणि सस्यजातानि आगतानि। प्राणदानकारणतः पृथुः पृथिव्याः पिता अभूत।

बोधप्रश्नाः

१. पृथिवी कं लोकं भयेन जगाम ?

२. पृथिव्याः दोहनसमये वत्सः कः आसीत् ?

## प्रचेतसां चरितम् –

पृथोः अन्तर्द्धानवादिनौ द्वौ पुत्रौ धर्मज्ञौ बभूवतुः। अन्तर्द्धानतः शिखण्डिनी हविर्धानं च व्यजायत। हविर्धानतः धिषणा प्राचीनबर्हि-शुक्र-कृष्ण-वृज-अजिनाख्यान् षड् सुतान् अजनयत्। हविर्धानतः उत्पन्नः प्राचीनबर्हिः एकः महान् प्रजापतिरासीत्। येन प्रजाः सम्बर्धिताः आसन्। अत्यधिकयज्ञानुष्ठानकारणतः सम्पूर्णपृथिव्यां दर्भाग्रभागः पपात। सः तपसः अनन्तरं समुद्रस्य तनयां सवर्णां उपयेमे। ततः दशपुत्राः जज्ञिरे। ते सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः अभवन्। ते सर्वे प्रचेतसः दशवर्षसहस्राणि समुद्रजले महत्तपः चक्रुः।

ततः प्राचीनबर्हिः तान् दशपुत्रान् सन्तानोत्पत्तिनिमित्तं अब्रवीत्। देवाधिदेवब्रह्मणः आज्ञया भवन्तः सर्वेऽपि प्रजानां वृद्धेः कारणभूताः भवन्तु इति। तन्मम प्रीतये कुरुध्वम्। येन वयं सर्वे प्रजावृद्धेः समर्थाः भवेम तत् कर्म उच्यतामिति सर्वे पप्रच्छुः। ततः तस्मात् प्रजाविवृद्ध्यर्थं सर्वभूतप्रभुं हरिं गोविन्दं आराधयत। दशसहस्रवर्षं यावत् जले मग्नाः सन्तः सर्वलोकपरायणं हरिं तुष्टुवुः। बहुकालानन्तरं भगवान् विष्णुः तान् सर्वान् दर्शनं ददौ। तं विष्णुं पतत्रिराजमारूढ़मवलोक्य प्रचेतसः भक्तिभावेन प्रणिपेतुः। ततः भगवान् विष्णुः तान् अभिलषितं वरं ददौ।

**बोधप्रश्नाः**

१. कति प्रचेतसः आसन्?

२. प्रचेतसः कति वर्षाणि यावत् तपश्चक्रुः।

## महर्षेः कण्डोः चरितम् –

प्रचेतसः यदा तपस्यायां मग्नाः बभूव तदानीं समग्रसंसारे प्रजाक्षयः जातः। एतान् प्रजाक्षयान् दृष्ट्वा प्रचेतसः कोपेन जलादागम्य मुखेभ्यो वायुमाग्निं च असृजन्। एतत्सर्वं निशम्य राजा सोमः तेभ्यो वृक्षाणां कन्यां मारिषां ददौ। तमुवाच सोमः यत् युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन अस्यां दक्षप्रजापतिः उत्पस्यते। ततः राजा सोमः तान् सर्वान् कण्डोः विषये अब्रवीत्।

कदाचित् वेदविदां वर: महर्षि: कण्डु: गोमतीतीरे सुरम्ये स्थाने परमं तप: तेपे। तस्य च ऋषे: परमतप: भग्नार्थं प्रम्लोचाख्या अप्सरा: देवेन्द्रेण प्रयुक्ता आसीत्। तां दृष्ट्वा विषयासक्त: सन् ऋषि: शतवर्षाणि यावत् तया सार्द्धमतिष्ठत्। तत: सा प्राह- अहं देवलोकं जिगमिषामि। तत: ऋषि: तामुवाच कतिचित्दिनानि स्थीयतामिति अभाषत। तत: पुन: वर्षशतं महात्मना सह प्रम्लोचा बुभुजे। पुन: सा आह- त्रिदशालयं गन्तुमनुमतिं देहि। कण्डु: पूर्ववत् प्राह। पुन: वर्षशते साधिके सा यामीत्याह, ऋषि: इहास्यतां क्षणं यत: चिरकालं यास्यति। तत: किञ्चिदूनं शतवर्षद्वयं क्रीडमाना सा अन्वतिष्ठत। यदा सा गन्तुमाह तदा ऋषि: स्थीयतामित्यभाषत। शापभयाद्भीता सा प्रम्लोचा मुनिं न जहौ। एकदा तु मुनिं दृष्ट्वा सा पप्रच्छ कुत्रेति त्वरया गम्यते। तत: सन्ध्योपासनं कर्तुं गमिष्यामीति प्राह – एतावत् पर्यन्तं किमर्थं न अकार्षीत्। तत: मुनि: तामुवाच अद्यैव प्रात: त्वया मम कूटीरे आगता। उपहास: किमर्थोऽयं मम कृते सद्भाव: कथ्यताम्। प्रम्लोचा तं मुनिमाह – भो ब्रह्मन्! अब्दशतानि गतानि। नवशतवर्षाणि सप्तोत्तराण्यतीतानि। तत: ब्रह्मर्षि: आत्मानं निनिन्द। एतादृशं वचनं श्रुत्वा सा सुन्दरी अतिवेपथु: सती स्वदजला बभूव। तस्या: स्वेद: आकाशाद् अध: तरुपल्लवानामुपरि पतित:। तस्मात् स्वेदात् एका सुन्दरी कन्या जाता यस्या: नाम मारिषा।

तत: क्षीणतप: मुनि: पुरुषोत्तमक्षेत्रं जगाम।

बोधप्रश्ना:

१. मारिषाया: पिता क: ?

२. प्रम्लोचा केन प्रेषिता ?

## ब्रह्मपारमन्त्रस्य महिमा

महर्षि: कण्डु: आत्मानं बहु निनिन्द। तत: पुरुषोत्तमाख्यं परमपावनं विष्णो: क्षेत्रं प्रति जगाम। तत्र ब्रह्मपारमन्त्रम् एकाग्रमतिर्भुत्वा जजाप। एवञ्च भगवत: श्रीविष्णोराराधनां चकार। अस्य मन्त्रस्य महिमा अवर्णनीया वर्तते। अस्य मन्त्रस्य जपं कृत्वा महर्षि: कण्डु: रागादिदोषविवर्जित: सन् परमधाम जगाम।

एतस्य मन्त्रस्य स्तवं यः पठिष्यति तथा नित्यशः श्रवणं करिष्यति सः कामदोषैरखिलैः मुक्तः सन् वाञ्छितं फलं प्राप्नोति।

| बोधप्रश्नः |
| --- |
| १. कं मन्त्रं जपन् कण्डुः परमपदं प्राप्तवान्? |

## मारिषाः पूर्वजन्मकथनम् –

मारिषा कण्डोः कामवशात् जाता कन्येति श्रुत्वा प्रचेतसां मनसि भावना क्षीणा जाता। ततः राजा सोमः तान् सर्वान् मारिषायाः पूर्वजन्मवृतान्तं प्राह। एषा मारिषा पूर्वजन्मनि एका भूपपत्नी आसीत्। मन्दभाग्यात् एतस्याः पतिः अपमृत्युं जगाम। ततः तया विष्णुः आराधितः। भक्त्या विष्णुं तोषयामास सा कन्या।

ततः साक्षात् विष्णुः पतयः श्लाघ्याः तथा पुत्राः प्रजापतिसमाः काले काले भवन्त्विति आशीर्वादं ददौ। एकस्मिन् जन्मनि तव प्रख्यातोदारकर्माणः दश पतयः भविष्यन्तीति अब्रवीत्।

| **बोधप्रश्नाः –** |
| --- |
| १. मारिषा कस्य कन्या वर्तते? |
| २. मारिषायाः कति पतयः भविष्यन्ति? |

**सारांश: —**

पराशर: मैत्रेयं प्रति ध्रुवस्य चरितं संक्षेपेण संश्रावयन् तत: ध्रुवस्य पुत्रपौत्रादीनां विषये श्रावितवान्। ध्रुवस्य वंशवर्णनप्रसङ्गे समयप्राप्ते वेनस्य चरितमस्मिन् अध्याये प्रस्तुतम्। वेनस्य दक्षिणोरु मथनात् तस्य परमप्रतापी पुत्र: पृथु: जज्ञे। तस्य च पृथो: राज्यशासनं तथा प्रजानुरञ्जकताम् अध्यायेऽस्मिन् सुष्टु प्रतिपादितम्। पृथो: सन्ततीनामपि वर्णनं प्रसङ्गानुसारं विद्यते। महर्षे: कण्डो: चरितं विस्तारेण प्रतिपादितम्। तस्य च महर्षे: तपस: प्रभावं नाशयितुमिन्द्रस्य प्ररोचनायामप्सरस: तेन सह वास: प्रसङ्ग: अध्यायस्यास्य महत्त्वं समुपास्ति। तत: तया अप्सरसा सह बहुवर्षं यावत् कालं यापयित्वा महर्षिकण्डु विचचार। तत: मारिषाया: जन्म प्रसङ्ग: विद्यते। निषादानां समेषां वर्णनपुर:सरं तेषां कर्माणि च प्रतिपादितानि वर्तन्ते।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः –

१. निषादानामुत्पत्तिः।

२. दक्षप्रजापतेः उत्पत्तिः।

३. पृथोः चरतिस्य श्रवणफलम्।

## विश्लेषणात्मकप्रश्नाः –

१. प्रचेतसामुत्पत्तिं प्रतिपादयत।

२. वेनचरितं स्पष्टीकुरुत।

३. पृथोः चरितं प्रतिपादयत।

## निबन्धत्मकप्रश्नाः –

१. ध्रुवस्य वंशं स्पष्टीकुरुत।

२. कण्डोः चरितस्य समीक्षां कृत्वा विशदयत।

## एकाङ्कप्रश्नाः –

१. पृथोः पिता कः?

२. मारिषा कस्य कन्या?

३. कः प्रजावत्सलराजा आसीत्?

४. अप्सरा केन प्रेषिता?

५. रिपोः पत्नी का ?

६. शिष्टेः कति पुत्राः आसन्?

७. प्रम्लोचा का आसीत्?

८. प्रचेतसः कं स्तुतिं चक्रे?

९. हविर्धानस्य कति पुत्राः बभूवतुः?

१०. का गोरूपं धृत्वा ब्रह्मलोके वभ्राम?

११. कण्डोः आश्रमः कुत्र आसीत्?

१२. विरणस्य कुलः कः ?

**उत्तराणि —**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| १. | वेनः | २. | कण्डोः | ३. | पृथुः | ४. | इन्द्रेण | ५. | बृहती | ६. | पञ्च |
| ७. | अप्सरा | ८. | विष्णुं | ९. | षड् | १०. | पृथिवी | ११. | गोमती | १२. | वरुणकुलः |

# षष्ठोऽध्यायः

## प्रस्तावना –

यद्यपि सर्वेषु पुराणेषु प्रायशः भगवतः अवतारादिविषयाः प्रमुखरीत्या प्रतिपाद्यन्ते तथापि विष्णुपुराणे सर्वेषां विष्णोः अवताराणां चित्रणं मार्मीकरीत्या आलोच्यते। प्रसङ्गक्रमेण सर्वेषामवताराणां वर्णनं समुचितस्थाने प्रतिभाति। अध्यायेऽस्मिन् भगवतः श्रीविष्णोः नृसिंहावतारस्य चित्रणं विहितं वर्तते। अत्र नृसिंहावतारविषयकं परिपश्नस्य समाधानं कथ्यते। प्रह्लादस्य चरित्रवर्णनमपि सुन्दररीत्या प्रतिपाद्यते। हिरण्यकशिपोः प्रह्लादं नाशयितुमुपायाः अपि अत्र समुपवर्णिताः। अध्यायस्यास्य प्रमुखवैशिष्ट्यं श्रीविष्णोः चिन्तनस्य फलं तथा एकग्रचेतसा विष्णोः स्मरणस्य महाफलं सुष्टु वर्णितं वर्तते। प्रह्लादकृता भगवत्स्तुतिः सम्यगत्र परिभाषते।

## उद्देश्यानि-

प्रिय पाठकाः अस्मिन् अध्याये भवन्तः सर्वे एतान् सर्वान् नवविन्दून् पठिष्यन्ति।

- मैत्रेयस्य नृसिंहावतारविषयकपरिप्रश्नः
- हिरण्यकशिपोः दिग्विजयः
- प्रह्लादचरितम्
- प्रह्लादस्य हननार्थं कृताः प्रयासाः
- प्रह्लादस्य भगवत्स्तुतिः

## मैत्रेयस्य नृंसिहावतारविषयकपरिप्रश्नः

मैत्रेय पराशरं प्रत्युवाच हे ब्रह्मन्! मनुपुत्राणां वंशवर्णनं भवद्भिःकृतम्। एतस्य चराचरात्मक्य जगतः मूलकारणं साक्षात् सनातनः विष्णुरेव। हे भगवन् प्रह्लादचरितं मे श्रावय। यं नाग्निः ददाह। अस्त्रै क्षुण्णः सनपि

जीवनं न तत्याज। शैलैः आक्रान्तोऽपि न ममार। पाशबद्धैः विक्षिप्ताङ्गैः सलिले स्थिते क्षोभतां न जगाम। तस्य चरितमहं श्रोतुमिच्छामि।

किमर्थं शम्बरादयः तं हननार्थं बहुप्रयासं कृतवन्तः? किमर्थं हलाहलं विषं तस्मै भक्षणाय दत्तम्? किमर्थं धर्मात्मनि महाभागे विमत्सरे विष्णुभक्ते सर्वे दैत्याः न हृष्यन्ति ? सर्वं चरितं तदेतत्कथ्यतां ।

**बोधप्रश्नः**

१. मैत्रेयः कं प्रह्लादविषये परिपप्रच्छ?

२. परमः विष्णुभक्तः कः?

## हिरण्यकशिपोः दिग्विजयः

पूर्वकाले दितेः पुत्रः महापराक्रमशाली महावीर्यः हिरण्यकशिपुः जज्ञे। त्रैलोक्यं वशीकर्तुं सः ब्रह्मणः आराधनां चकार। ततः ब्रह्मणः वरेण दर्पितः सः दैत्यः हिरण्यकशिपुः इन्द्रत्वमकरोत् । सः समेषां वायुरग्निरपां नाथः आसीत्। सूर्यसोमावरुणकुबेरचन्दमसामपि स्वामी आसीत्। देवाः सर्वे स्वर्गं परित्यज्य मानुषीं तनुं स्वीकृत्य पृथिव्यामाजग्मुः। त्रिभुवनं सर्वं जित्वा सः समग्रे स्वर्गलोके उपगीयमानः त्रैलोक्यैश्वर्यदर्पितः सः बुभुजे।

सर्वे सिद्धगन्धर्वाः तस्य जयकारं दैत्यराजस्य पुरतः जग्मुः। अप्सरसां नृत्यगीतादिकं दृष्ट्वा सः हिरण्यकशिपुः आनन्देन प्रासादे सुमनोहरे पानं पपौ। कृत्स्नं स्वर्गलोकं तस्य अधीने आसीत्। तत्र सः सिंहासनमारूढ़ः सन् अतिष्ठत्।

बोधप्रश्नाः

१. हिरण्यकशिपुः कस्मिन् वंशे जज्ञे?

२. के दैत्यराजस्य स्तुतिमकार्षीषुः?

## प्रह्लादचरितम् –

हिरण्यकशिपोः एकः पुत्रः प्रह्लादः परमविष्णुभक्तरासीत्। सः गुरुणा सह अध्ययनकार्ये रतः आसीत्। तदानीं गुरुदेवः तं प्रह्लादं स्वीकृत्य हिरण्यकशिपोः समीपे तस्थौ। हिरण्यकशिपुः तं प्रह्लादं पप्रच्छ, एतावता किं सारभूतं भवता शिक्षितम्? प्रह्लादः समेषां सारभूतं रहस्यं अनाद्यनन्तवृद्धिक्षयादिरहितमच्युतमेवेति अब्रवीत्। एतन्निशम्य हिरण्यकशिपुः सकोपेन रक्तचलोचनः सन् तद्गुरुं प्राह किमर्थं विपक्षस्तुतिं शिक्षयामास मामवज्ञाय। गुरुः प्राह ममोपदेशजनितं नायं वदति। ततः हिरण्यकशिपुः त्वं कस्मादेतत् अनुशिष्टोऽसीति पप्रच्छ। परमात्मनं तम् ऋते कः केन शास्यते इति प्रह्लादः आह। किमर्थं मर्तुकामस्त्वं पुनः पुनः प्रब्रवीषि। कः सः प्रविष्टः तव हृदये? ततः प्रह्लादः प्रत्युवाच न केवलं मम हृदि विष्णुः विराजते अपितु सर्वत्र अखिलान् लोकान् आक्रम्य विष्णुः अवस्थितः। पुनः गुरुशुश्रूषणोद्यतः प्रह्लादः विद्यामनिशं गुरुगृहं जग्राह। कालेऽतीते प्रह्लादमाहूय काचित् गाथा गीयतामिति दैत्यराजः अब्रवीत्। पुनः प्रह्लादः विष्णोः गाथा श्रावयामास। ततः कोपेन हिरण्यकशिपुः वध्यतामेष इति अवोचत्। स्वपक्षहानिकर्तुकत्वाद्यः एष कुलाङ्गारतां गतः। ततः तं गृहीत्वा शतसहस्रशः दैत्याः नाशाय उद्यताः अभूवन्। ततः प्रह्लादः प्राह विष्णुः सर्वेषु शस्त्रेषु व्यवस्थितः, अनेन सत्येन एतानि आयुधानि प्रह्लादस्य किमपि कर्तुं नाशक्नोत्। यस्य स्मरणमात्रेण सकलचराचरस्य प्रपञ्चस्य जराजन्मादिदुःखानि सर्वाणि अपयान्ति, हृदि सः स्थिते मम को भयः। हिरण्यकशिपुः ततः दुराचारं दुर्मतिं प्रह्लादं विषज्वालाकुलैः मुखैः कुहकस्तक्षकादयः गात्रेष्वतिविषोल्बणाः अदशन्त। ततः सर्पाः प्राहुः दंष्ट्रा विशीर्णा जाता, मणयः स्फुटन्ति , फणेषु तापो हृदयेषु कम्पः जायते परन्तु एतस्य बालकस्य किमपि न भवति, अतः अन्यत् कार्यं प्रशाधि। हिरण्यकशिपुः गजान् प्रह्लादस्य हननार्थमादिदेश। ततः जनार्दनस्य स्मरणमात्रेण सा महाविपत्तिरपि अपगता। ततः विविधाः चेष्टाः कृताः परन्तु न किमपि अभूत्।

भार्गवस्यात्मजाः प्रोचुः एनं वालं विपक्षनाशाय शिक्षयामः। ततः यदि हरेः नाम न त्यक्षति तर्हि अस्य वधाय यत्नः करिष्यते। एवं रूपेण प्रह्लादः सर्वत्र विष्णुं ददर्श।

**बोधप्रश्नाः**

१. प्रह्लादः कस्य पुत्रः आसीत्?

२. प्रह्लादः सर्वत्र कं ददर्श।

## दैत्यपुत्राय प्रह्लादस्योपदेश: —

शतश: कृतेऽपि प्रयत्ने प्रह्लादं अग्नि: न ददाह। भार्गवात्मजानां वचनेन हिरण्यकशिपु: तं बालकं तै: सह प्रेषयामास। तदानीं प्रह्लाद: सर्वान् दैत्यबालकान् दिव्यमुपदेशं श्रावयामास। सर्वेषां मानवानां जन्म बाल्यावस्थायां भवति तथा क्रमश: यौवनं जरा च अव्याहतैव अनुदिवसमागच्छति। वार्द्धक्यानन्तरं मृत्युमभ्येतीति प्रत्यक्षमेतत् अस्माभि: दृश्यते। मृतस्यापि पुन: जन्म भवति। गर्भवासादारभ्य समस्ता: अवस्था: दु:खस्वरूपमिति अवगम्यताम्। यथा अत्यन्तअस्तिमिताङ्गानां व्यायामेन सुखं लभ्यते तथैव भ्रान्तिज्ञानात् दु:खमेव सुखायते। क्व श्लेष्मादीनां समुच्चयरूपशरीर: क्व शोभासौन्दर्यरमणीयादिगुणा: ?

यावत् मनस: प्रियान् सम्बन्ध: क्रियते जन्तुना तावदवश्यं दु:खं प्राप्यते। अत: संसारसागरे विष्णुरेव अस्मान् परित्रातुं शक्नोति। वयं सर्वे बाला: इति न जानीत बालावस्था तु देहस्य धर्मो भवति। क्रमश: अयं देह: यौवनं तथा जारवस्थां प्रति गमिष्यति। य: बालोऽहमिति मत्वा कार्याणि समस्तानि यौवने यतिष्ये इति चिन्तयति पुन: यौवनसमये श्रेयसे वार्द्धक्ये हितं करिष्यामीति चिन्तयति स: कदाचिदपि किमपि कर्तुं न शक्नोति। बाल्ये क्रीडनकासक्ता: यौवने विषयोन्मुखा: वार्द्धक्ये किमपि न करिष्यन्ति। तस्मात् बाल्ये विवेकात्मा श्रेयसे नित्यं यतते। तस्य विष्णो: अहर्निशं चिन्तनेन पपाक्षयातां याति। विष्णु: साक्षात् सर्वमिदं जगत् वितनोति। अत: विचक्षणपुरुषै: अत्मैव अनुद्रष्टव्यम्। अत: दैत्यभावं उत्सृज्य तत्प्राप्तये यत्नं करिष्याम:। यत् पदं न यक्षैर्न च दैत्येन्द्रै: न च किन्नरै: प्राप्तुं शक्यते तत् विष्णो: आराधनायां लभ्यते।

हे दैत्यपुत्रा: ! कदाचिदपि अस्मिन् मयापूरिते संसारे विषयासक्ता: मा भवन्तु। सर्वत्र समदृष्टिं कृत्वा भगवत: सान्निध्यं सम्प्राप्तुं प्रयास: क्रियताम्। कदाचिदपि धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयानां वशाीभूता: मा भूत्वा श्रीविष्णो: स्मरणं क्रियताम्।

बोधप्रश्ना:

१. प्रह्लाद: कान् बोधयामास ?

२. कस्य शरणं परममोक्षदायकं वर्तते ?

## प्रह्लादस्य नाशनाय कृतप्रयासाः –

यदा प्रह्लादस्य सर्वेषां कृते भगवत् विषयकं व्याख्यानं हिरण्यकशिपुः ददर्श। सकोपं सूदामाहूय सर्वभक्षेषु हलाहलं विषं संस्थाप्य तस्मै भोक्तु दीयतामिति आदिदेश। ततः सः सूदा प्रह्लादस्य भोजने हलाहलं विषं संस्थाप्य भोक्तुं ददौ। सः प्रह्लादः भगवतः श्रीविष्णोः मन्त्रमुच्चारणं कृत्वा अभिमन्त्र्य बुभुजे। तद्भुक्त्वा कोऽपि विकारः तस्य न जातः। ततः सः सूदा महद्विषं जीर्णं दृष्ट्वा दैत्येश्वराय अब्रवीत्। ततः हिरण्यकशिपुः पुरोहितान् उवाच त्वर्यतां तस्य विनाशाय।

ततः पुरोहिताः तं बालकं प्रोचुः हे आयुष्मन्! भवान् दैत्यराजस्य तनयः, भवतः पिता सर्वलोकानां अधिष्ठाता वर्तते। त्वं तथैव भविष्यति। अतः यत् प्रशंसनीयं तत् उच्यताम्। सः बालकः तथैव साक्षात् विष्णुरेव अस्य चराचरात्मकस्य जगतः रचयिता, पालनकर्ता, संहारकर्ता चेति अब्रवीत्। सः सर्वेषामन्तःकरणे हृदि च निवसति। पुरोहिताः तं बालकं प्राह हे बालक! यदा अस्माकं वचनं न श्रुत्वा हरेः सङ्कीर्तनं न त्यक्ष्यते ततः विनाशाय उपायाः वयं चिन्तयामः।

प्रह्लादः तानुवाच कः केन हन्यते ? कश्च केन रक्ष्यते? कर्मणा एव सर्वं जायते कर्म एव सर्वेषां गतिसाधनम्। कोपेन दैत्यराजस्य पुरोहिताः स्वशरीरेभ्यो ज्ज्वलाग्निम् उत्पादयामासुः। पुनः प्रह्लादं प्रति एकं ज्वालग्निरूपं शूलं क्षेपयामास। तत् शूलमपि शतधा खण्डं भूत्वा भूमौ व्यपतत्। ततः पुरोहिताः तं प्रोचुः हे वत्स! भवान् अतीव श्रेष्ठः। बलवीर्यसमन्वितः दीर्घायुरप्रतिहतः पुत्रपौत्रधनैश्वर्ययुक्तः भूयताम्। ततः सर्वे द्विजाः दैत्यराजाय सकलं यथावृतम् आचचक्षुः। प्रह्लादस्य मनसि भगवतः विष्णोः परमभक्तिः तं सर्वक्लेशेभ्यः तारयति।

**बोधप्रश्नाः**

१. प्रह्लादं प्रति पुरोहिताः किं क्षेपयामस?

२. कः हलाहलं विषं भोजने प्रह्लादाय ददौ?

## प्रह्लादस्य भगवत्स्तुतिः

एतान् सर्वान् निशम्य हिरण्यकशिपुः तं पुत्रं परिपप्रच्छ एतत् सर्व भवतः मन्त्रादिजनितं स्वाभाविकं वेति। ततः प्रह्लादः उवाच यस्य हृदि भगवतः श्रीविष्णोः निवासः वर्तते, यस्य हृदि अन्येषां कृते पीडाभावना न वर्तते कर्मणा वाचा पापं नास्ति तस्य कदाचिदपि किमपि अशुभं न भवति। अहं सर्वदा हृदि सर्वभूतस्थभगवन्तं नारायाणं चिन्तयन् सर्वं करोमि। ततः बालकः प्रसन्नचेतसाऽपि भगवतः स्मरणं चकार।

प्रह्लादस्य अन्तःकरणे भगवन्तं विष्णुमतिरिच्य अन्यः कोऽपि नासीत्। तस्मात् सः स्वयमात्मानं विसस्मार। स्वयमेव अव्ययानन्तपुरुषोत्तमः इति अचिन्तयत्। अनेन योगबलेन प्रह्लादं कश्चिदपि नाशयितुं न शशाक। अग्निश्च न ददाह। ततः प्रह्लादः विष्णोः नामानि तथा तस्य च विशेषणानि स्वीकृत्व भजनं चकार। भक्तेः अन्तिमां पराकाष्ठामपि सः गतः। कालातीतव्यक्ताव्यक्तक्षराक्षरसकलेश्वरगुणाधारस्थूलसूक्ष्मसदसत् श्री विष्णुः सर्वत्र विद्यमानः इति मनसि चिन्तयन् यत् किमपि पश्यति तत्र श्रीविष्णोः सत्तामङ्गीकुरुते।

**बोधप्रश्नाः –**

१. कः स्वयमात्मानं व्यस्मरत्?

२. कालातीतक्षराक्षरः परमपुरुषोत्तमः कः ?

# सारांश: —

मैत्रेय: समेषां वंशानां विषये श्रुत्वा कदाचित् भगवन्तं पराशरं प्रति भक्तश्रेष्ठस्य प्रह्लादस्य विषये ज्ञातुं इयेष। तत: पराशरमहर्षि: तं सर्वं श्रावयामास। दिते: पुत्र: हिरण्यकशिपु: कश्यपकुले जज्ञे। ब्रह्मण: वरेण स: इन्द्रत्वं सम्प्राप्य विचचार। तस्य पराक्रमस्य गाथा अविस्मरणीया। सिद्धागन्धर्वा: अप्सरस: अपि तस्य गुणगानादि कुर्वन्त: आसन्। स्वप्रभावेन त्रैलोक्यं जित्वा सर्वान् प्रशाधि। अस्मिन् अध्याये तस्य हिरण्यकशिपो: शौर्यं पराक्रमश्च समुपवर्णितो वर्तते। तस्य पुत्रस्य प्रह्लादस्य भगवति असीमा भक्तिरपि साधिता वर्तते। प्रह्लादस्य असुरबालकेभ्य: शिक्षा तथा उपदेश: समुपवर्णित:। स्वज्ञानबलेन स: सर्वान् समुचितशिक्षां दत्वा प्रबोधयामास। तस्य एतादृशं कार्यं दृष्ट्वा पिता हिरण्यकशिपु: कोपितोऽभवत्। विष्णो: नामसङ्कीर्तनादिकं कर्तुं निवारयामास। तत: गुरु: अपि तं बहु प्रत्यबोधयत्। ततोऽपि स: विष्णो: नामसङ्कीर्तनं कृत्वा सर्वत्र विष्णुं पश्यन् सर्वान् तदुपदेशं शिक्षयामास। तं विनाशयितुं सर्वविधान् उपायान् अपि आचरितवन्त:। परन्तु भगवत: श्रीविष्णो: कृपया किमपि तस्य नाभवत्। अत: एतादृशी भक्ति: रमणीया वर्तते। पुन: हिरण्यकशिपु: तं स्नेहेन बहु प्रश्नान् पप्रच्छ। स: प्रह्लाद: तस्य पितु: सर्वेषां प्रश्नानामुत्तराणि ददौ। यथोचितमुक्त्वा पुन: विष्णो: सर्वात्मकतां प्रतिपादयामास। अध्यायेऽस्मिन् पुन: पुरोहितानां तं नाशयितुं प्रयासादिकं वर्णितं वर्तते।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः –

१. पितुः हिरण्यकशिपोः प्रश्नाः।

२. मैत्रेयस्य परिप्रश्नाः ।

३. प्रह्लादस्य भगवत्स्मरणम्।

## विश्लेषणात्मकप्रश्नाः –

१. प्रह्लादस्य भक्तेः परमशक्तिं प्रतिपादयत।

२. प्रह्लादस्य हननार्थं कृताः प्रयासाः स्पष्टीकुरुत।

३. प्रह्लादकृतद्भवत्स्तुतिं विवृणुत।

## निबन्धत्मकप्रश्नाः –

१. दैत्रपुत्रेभ्यः प्रह्लादस्योपदेशं स्पष्टीकुरुत।

२. हिरण्यकशिपोः दिग्विजयं विवृणुत।

## एकाङ्कप्रश्नाः –

१. प्रह्लादः केभ्यः उपदेशं ददौ ?

२. कः इन्द्रत्वमकरोत्?

३. हिरण्यकशिपोः माता का ?

४. के दानवराज्ञः जयकारं चक्रुः ?

५. मानुषीं तनुं धृत्वा के व्यभ्रमन्?

६. कस्मिन् वंशे हिरण्यकशिपुः जज्ञे ?

७. दिते स्वामी कः ?

८. कस्य वरस्य प्रभावेन दानवः सर्वान् जघान ?

९. मन्त्रजलानि प्रह्लादं प्रति के क्षेपयामासुः ?

१०. अग्निः कं न ददाह ?

११. प्रह्लादः कं सर्वदा स्मरति ?

१२. प्रह्लादस्य रक्षार्थं विष्णुः कस्यावतारं दधौ ?

१३. प्रह्लादस्य पुत्रः कः ?

**उत्तराणि —**

१. दैत्यपुत्रेभ्यः २. हिरण्यकशिपुः ३. दिति ४. सिद्धगन्धर्वाः ५. देवाः ६. काश्यप ७. कश्यपः ८. ब्रह्मणः ९. पुरोहिताः १०. प्रह्लादं ११. विष्णुं १२. नरसिंहस्य १३. विरोचनः

# सप्तमोऽध्याय:

## प्रस्तावना —

हिरण्यकशिपो: प्रह्लादं नाशयितुं अग्न्यादीनां प्रयोग: तेन भगवत्स्मरणमात्रेण व्यर्थीकृत:। प्रह्लाद: सर्वत्र भगवत: सत्तां स्वीकुर्वन् स्वदैत्यबालकानपि उपदेशं श्रावयामास। तत: कदाचित् मूढ़चेतसा हिरण्यकशिपु: सर्वं विज्ञाय तत् हननार्थं बहुचेष्टामकार्षीत्। सप्तमोऽध्यायेऽस्मिन् प्रह्लाद: भगवत: सुन्दरं गुणवर्णनं चकार। तत: साक्षात् भगवता प्रेषितं चक्रं प्रह्लादस्य रक्षणञ्च अकरोत्। भगवत्स्तुत्या साक्षात् भगवत: नृसिंहरूपेण आविर्भाव अध्यायस्यास्य महत्वैशिष्ट्यतामुपैति। तत: परं काश्यपस्य अन्यासां स्त्रीणां वर्णनं मरुद्गणानां उत्पत्तिविषयकं चित्रणं चकास्ति। भगवत: श्रीमन्नारायणस्य विविधनां विभूतीनां वर्णनं जगत: व्यवस्थावर्णनमध्यायेऽस्मिन् प्रतिपाद्यते।

## उद्देश्यानि —

अस्मिन् अध्याये भवन्त: एतान् सर्वान् विन्दून् ज्ञास्यन्ति ।

- हिरण्यकशिपो: नीतिशास्त्रविषयकं प्ररिप्रश्न:
- कश्यपवंशवर्णनम्
- मरुद्गणानामुत्पत्ति:
- भगवत: श्रीविष्णो: विभूतय:
- भगवत: श्रीविष्णो: चतुर्धास्वरूपम्
- परमपदस्य चतुर्भेदकल्पना –
- श्री विष्णो: आयूधानि भूषणानि च —

## हिरण्यकशिपोः नीतिशास्त्रविषयकं प्ररिप्रश्नः

प्रह्लादाय अहन्यहनि आचार्यः नीतिं राज्यफलप्रदां शिक्षां ग्राहयामास। तत् सर्वं सः बालकः सानन्देन एकस्मिन् दिने गृहीतनीतिशास्त्रं पितुः सकाशं जगाम। ततः पिता तमुवाच हे पुत्र कैः मित्रैः सह अरिभिः सह च कीदृशः व्यवहर्तव्यः। प्रह्लादः मन्त्र्यमात्यसेवकगुप्तचरादिभिः सह कथं चरेत्? कृत्याकृत्यविधानं तथा दुर्गाटविकसाधनभुतं रहस्यं कथ्यतामिति पप्रच्छ।

प्रह्लादः सर्वं श्रावयामास यत् ममोपदिष्टं सर्वं गुरुणा इति नात्र संशयः। सामदानदण्डभेदाख्याः सर्वेऽपि उपायाः कथिताः। भगवान् विष्णुः तु सर्वत्र विराजते समेषां हृदि। ततः कस्य कः मित्रः कस्य कश्च शत्रुः वर्तते। अतः अविद्याजन्यं कर्म त्यक्त्वा विद्याजन्य कर्म कर्तव्यम्। कर्म तत् भवति यत् वन्धनस्य कारणं न भवति। अतः सर्वमसारमिति मत्वा उत्तमसारं च वक्ष्यते। यस्मै महत्वैभवं राज्यं धनञ्चापेक्षते तस्मै पुण्यसञ्चयः कर्तव्यः। समभावदर्शी भूत्वा सर्वत्र एकत्वं परमस्वरूपं प्राप्तिहेतुकं परमस्वरूपं यतितव्यम्।

बोधप्रश्नाः -

१. कः प्रह्लादं नीतिशास्त्रमपाठीत् ?

२. हिरण्यकशिपुः प्रह्लादं किं पप्रच्छ ?

## कश्यपवंशवर्णनम्–

प्रह्लादतः विरोचनः ततः बलिः जज्ञे। संह्लादतः आयुष्माञ्छिबिर्बाष्कलादयः जज्ञिरे। बल्याः शतपुत्राः आसन् येषु पुत्रेषु अग्रगण्यः बाणासुरः आसीत्। ततः हिरण्याक्षतः उत्कुर-शकुनि-भूतसन्तापन-महानाभ-महाबाहु-कलनाभादि प्रराक्रमशालिनः आसन्।

भगवतः कश्यपस्य द्वितीया पत्नी द्विमूर्धाशम्बरायोमुखशङ्कुशिराकपिलशङ्करैकचक्रमहाबाहुतारक-महाबलस्वर्भानुवृषपर्वामहाबलीपुलोमविप्रचित्याख्यान् पुत्रान् असूयत। स्वर्भानोः कन्या प्रभा तथा शर्मिष्ठोपदानीहयशिराः तिस्रः वृषपर्वणः कन्यकाः आसन्। वैश्वानरस्य पुलोमाकलिकाख्ये द्वे कन्ये मरीचिनन्दनस्य कश्यपस्य भार्ये अभवताम्। तयोः सकाशात् षष्टिसहस्राणि संख्यकाः दानवाः जज्ञिरे।

विप्रचित्या: सकाशादपि सिंहिकाया: गर्भात् बहव: दानवा: क्रुरा: जज्ञिरे। एते सर्वे दानवा: दनो: वंशवृद्धे: काराणभूता: आसन्। महता तपसा प्रह्लादस्य कुले आत्मज्ञानसम्पन्न: दैत्यप्रवर: निवातकवचाख्य: पुत्र: जज्ञे।

भगवत: कश्यपस्य पत्नी ताम्रा शुकीश्येनीभासीसुग्रीवीशुचिगृध्रिकाख्या: अतिप्रभावशालिन्य: कन्यका: असूयत। शुकीत: शुक-उलुक-काकादय: प्रदुरभवन्। श्येनीत: श्येन(बाजपक्षी) जज्ञे। विनताया: द्वौ गरुडारुणाख्यौ पुत्रौ समजायताम्। सुरसायां सहस्रसर्पाणां उत्पन्नरभूत्। ये च सर्पा: विशालकाया:, प्रभावशालिन: आसन्। ते च सर्वे शेषवासुकितक्षकशङ्खश्वेतमहापद्मकम्बलाश्वतरैलापुत्रनागकर्कोटकधनञ्जयादय: आसन्। क्रोधवशाया: पुत्रा: क्रोधवशा:, ये च दारुणा: पिशिताशना: दंष्ट्रिण: आसन्। सुरभितनया: सर्वा: धेनव: अभवन्। खासाया: सकाशात् सर्वे यक्षरक्षसां, मुने: अप्सरसां, तथा अरिष्टाया: सकाशात् गन्धर्वानां प्रादुर्भाव: जात:। एतत् सर्वं स्वारोचिषमन्वन्तरस्य सृष्टे: विवरणं वर्तते। वैवस्व्मन्वन्तरस्य प्रारम्भे महान् वारुणजज्ञ: अभवत्।

बोधप्रश्ना: –

१. ताम्राया: कति कन्या: आसन्?

२. श्येनपक्षी कस्या: सकाशात् जज्ञे।

३. शेषादय: नागा: कतिसंख्यका: ?

## मरुद्गणानामुत्पत्ति: —

पूर्वस्मिन् मन्वन्तरे सप्तर्षय: स्वयं ब्रह्मण: मानसपुत्रा: आसन्। अस्मिन् कल्पे तान् सर्वान् गन्धर्वनागदेवपितृदानवादिरूपेण कल्पयामास। पुत्राणां क्षयं दृष्ट्वा दिति: काश्यपं तोषयामास। तत: दिति: काश्यपस्य आराधानाया: फलस्वरूपमिन्द्रस्य विनाशाय समर्थयुक्तं पुत्रं वव्रे। स: मुनि: काश्यप: तस्यै अत्युग्रवरं दत्वा अब्रवीत् यदि भगवत: ध्याने तत्परा भविष्यति, संयमपूर्वकं शतं वर्षाणि गर्भं धारयिष्यसि तर्हि तव इन्द्रनिहन्ता पुत्र: भविष्यति। तत: सा दिति: गर्भं धारयामास।

इन्द्रः आत्मवधार्थाय गर्भं ज्ञात्वा विनयपूर्वकं सेवाकर्तुमागतः। वर्षशते ऊने एकदा पादयोः शौचं न कृत्वा दितिः शयनमाविशत्। ततः निद्रा तां चाहारयामास। तस्मिन् समये इन्द्रः तस्याः कुक्षिं प्रविश्य महागर्भं सप्तधा चिच्छेद। सः गर्भः वज्रेण सम्पीड्यमानः सन् अतिदारुणं रुरोद। ततः मा रोदीः इति इन्द्रः पुनः पुनः अभाषत। एकैकं पुनः सप्तधा वज्रेण चक्रे। ते च सर्वे मरुतो नाम देवाः अतिवेगिनः अभवन्। एते सर्वे च एकोनपञ्चाशत्संख्यकाः देवानां सहायकाः बभूव।

बोधप्रश्नाः –

१. कस्य विनाशाय दितिः गर्भं धारयामास ?

२. निद्रा काम् आहारयामास ?

३. कति मरुतः बभूव।

## भगवतः श्रीविष्णोः विभूतयः —

पूर्वं यदा महर्षिभिः पृथुः राज्ये अभिषिक्तः ततः क्रमेण लोकपितामहः राज्यानि अपि सर्वेभ्यो ददौ। ब्रह्मा चन्द्रमसं नक्षत्रग्रहसोमविप्रवीरुधादीनां राजारूपेण नियुक्तवान्। ततः ब्रह्मा राज्ञामधिपतिरूपेण वैश्रवणं तथा जलानां वरूणं, आदित्यानां विष्णुं वसूनां पावकं, प्रजापतीनां दक्षं, मरुतां वासवं, दैत्यानां दानवानां प्रह्लादं, पितृणां धर्मराजं, गजेन्द्राणाम् ऐरावतं क्रमशः प्रतिष्ठापयाञ्चक्रे। पतत्रिणां गरुडं, देवानां वासवं, अश्वानां पतिरूपेण उच्चैश्रवां, वृषभं गवामधिपतिरूपेण प्रतिष्ठापयामास। मृगाणां पतिः सिंहः, सर्पाणां स्वामीरूपेण द्वन्दशुकः, स्थावराणां हिमालयः, मुनीनां कपिलः, नखिनां दंष्ट्रिणां मृगाणां च व्याघ्रश्च राजा बभूव। वनस्पतीनां प्लक्षं, अन्यजातीनां प्राधान्येन अभ्यषेचयत्। एवं राज्यानां पालनानन्तरं प्रजापतिः ब्रह्मा दिशां स्वामीरूपेण पूर्वस्यां दिशि सुधन्वानं सुतं वैराजं, पश्चिमश्यां दिशि अच्युतं केतुमन्तं, दक्षिणस्यां दिशि कर्दमस्य पुत्रं शङ्खप्रदं, उत्तरस्यां दिशि पर्जन्यस्य पुत्रं हिरण्यरोमाणं स्थापयामास। एते सर्वेऽपि स्वधर्मानुसारं संसारस्य तथा पृथिव्याः परिपालनं

नियतिपूर्वकं चक्रु:। एते सर्वेऽपि विष्णो: महात्मन: अंशभूता: भवन्ति। ये प्राक् आविर्भुता: अग्रे च भविष्यन्ति ते सर्वेऽपि विष्णो आधारभूता: वर्तन्ते। ये च दिशामधिपतय: वनस्पतीनां स्वामिन:, स्थावरादीनामधिपा: भवन्ति, ते च सर्वेऽपि विष्णो: आज्ञानुसारं स्व स्व कर्मणि प्रवृत्ता: भवन्ति। न हि पालनसामर्थ्यं हरिं ऋते कस्यापि वर्तते। स: एव विष्णु: जगत: परिपालनार्थं संहारार्थं सृष्ट्यर्थं च समयादिकं चिन्तयति।

## भगवत: श्रीविष्णो: चतुर्धास्वरूपम् –

भगवान् विष्णु: साक्षात् अस्य चराचरात्मकस्य जगत: सृष्टिस्थितिलयानां कर्ता वर्तते। तस्यैव आज्ञानुसारं सर्वे ब्रह्मादय: देवगणा: स्व कर्मणि प्रवृत्ता: सन्त: प्रपञ्चस्यास्य परिपालनं कुर्वन्ति। अयं जनार्दन: संसृष्टौ चतुर्विभाग: स्थितौ च चतुर्धा प्रलयं च चतुर्धा करोति। एक: स्वरूप: अव्यक्तरूपब्रह्मा, द्वितीयोऽश: मरीच्यादय: ऋषय:, तृतीय: काल:, चतुर्थ: प्राणी। तद्वत् रजोगुणविशिष्ट चतुर्भि: रूपै: स्थितिं भुनक्ति। स्थितिसमये प्रथमोऽंश: विष्णु:, द्वितीय: मनु:, तृतीय: काल:, चतुर्थ: सर्वभूतेषु संस्थित: भवति। अन्तिमसमये तमोगुणविशिष्टां वृत्तिं समाश्रय प्रथमे रुद्र:, द्वितीये अग्नि:, तृतीये काल:, चतुर्थे भूतस्वरूप: वर्तते। ब्रह्मादक्षप्रजापतिगणकालश्चेति सर्वे भगवत: विभूतय: भवन्ति।

बोधप्रश्ना: –

१. कतिभि: रूपै: प्रलयं भगवान् विष्णु: ससर्ज ?

२. के च ते प्रलयस्वरूपा: विष्णो: अंशभूता: ?

## परमपदस्य चतुर्भेदकल्पना –

मैत्रेय: ब्रह्मभूतस्य विष्णो: चतुष्प्रकारकं परममपदं यथान्यायम् आचचक्ष्व इति पप्रच्छ। तत: पराशर: मुनि: मैत्रेयं प्रति उवाच हे मैत्रेय! सर्ववस्तुषु यत् कारणं भवति तत् साधनम्। वस्त्वाभिमतं यत्साधयितुं कांक्ष्यते तत् साध्यम्। मुक्तिकामस्य योगिन: प्राणायमादि साधनं तथा साध्यं भवति परब्रह्म। योगिनां साधनालम्बनज्ञानं

तस्य परमपदस्य ब्रह्मभूतस्य प्रथमभेदः। क्लेशवन्धनात् मुक्त्यर्थं योगिनः यद्ग्राह्यं तस्य ज्ञानं आलम्बनविज्ञानं परमपद्य द्वितीयभेदः। उभयोः साध्यसाधनयोः यत् विज्ञानं अद्वैतमयज्ञानं तत् परमपदस्य तृतीयभेदः। आत्मज्ञानस्वरूपस्य श्रीविष्णोः अनिर्वचनीयं, व्याप्तिमात्रं, अनुपमं, आत्मबोधस्वरूपं, अलक्षणं, शान्तं, अभयं, शुद्धं, भावनातीतं, आश्रयहीनं च यत् रूपं तत् ब्रह्मज्ञानं परमपस्य चतुर्थभेदः यद्धि परिकल्पितः।

बोधप्रश्नाः

१. परमपदनिमित्तं योगिनां साधनं किम्?

२. अद्वेतमयज्ञानं परमपदस्य कः भेदः ?

## श्री विष्णोः आयूधानि भूषणानि च —

अयं विष्णुः सर्वासां पराशक्तीनां बीजभूतो वर्तते। जगतः सृष्टिस्थितिलयकर्तारं भगवन्तं नमस्कृत्य यताख्यातं विवरणं यथा वसिष्ठेन प्रदत्तं तत् सर्वं प्रतिपादयामास। इदं जगत् निर्लेपमगुणामलं भगवान् विष्णुः आत्मानं कौस्तुभमणिस्वरूपं बिभर्त्ति। श्रीअनन्तः प्रधानं तथा बुद्धिं माधवस्य श्रीगदा धारयामास। राजसतामसाहङ्कारौ विष्णोः शार्ङ्गशङ्खस्वरूपौ भवतः। श्रीविष्णोः चक्रं मनः धारयति। श्रीविष्णोः पञ्चरूपा वैजयन्ती माला पञ्चतन्मात्ररूपा भवति। पञ्चकर्मज्ञानेन्द्रियाणि भववान् विष्णुः शररूपेण धारयति। एवं रूपेण सर्वं श्रीहृषीकेशस्य आश्रयभूतानि सर्वाणि तत्त्वानि। सर्वाणि भूतानि विष्णोः अस्त्रभूषणादीनि। कलाकाष्ठानिमेषदिनादीनि कालमानानि विष्णोः अंशभूतानि भवन्ति। भूभूवस्वादि लोकाः अपि विष्णोः अंशभूताः भवन्ति। सर्वेषां जनानां विद्यायाः आधारः श्रीहरिः लोकमयस्वरूपे तिष्ठति। सर्वेश्वरः भगवान् नारायणः एव सर्वेषु भूतजातेषु विद्यमानः। अस्मिन् लोके यत्रकुत्रापि वा यानि अनवद्यानि भूतजातानि विद्योनन्ते तानि सर्वाणि कार्यकारणादीनि भगवतः श्रीविष्णोः स्वरूपभूतानि भवन्ति।

बोधप्रश्ना: —

१. विष्णो: चक्रं कस्य स्वरूपम् ?

२. बुद्धि: कया रूपेण स्थिता वर्तते ?

## सारांश: —

श्रीविष्णो: नवधाभक्ति: प्रसिद्धा वर्तते। भक्तश्रेष्ठस्य प्रह्लादस्य भक्तिभावनाया: असीमितत्वं प्रतिपादितं वर्तते। दानवराजस्य हिरण्याक्षस्य पुत्रत्वेन प्रह्लाद: जात:। परन्तु शिक्षां समाप्य सर्वं शास्त्रगतं रहस्यं पितु: समीपे विष्णो: नाम एवैति प्रतिपादयामास। हिरण्याक्ष: प्रह्लादं प्रति नीतिशास्त्रगतान् प्रश्नान् पप्रच्छ। प्रह्लाद: समेषां प्रश्नानामुत्तराणि विष्णुपरकाणि ददौ। तत: साक्षात् कोपित: हिरण्याक्ष: तं प्रह्लादं नाशयितुं प्रयासं चकार। विष्णो: नामस्मरणं कृत्वा अस्त्रशस्त्रादीनां प्रभाव: भक्तश्रेष्ठेन प्रह्लादेन निष्फलीकृत:। सर्वत्र विष्णो: सत्तां वर्तते तथा श्रीविष्णो: सर्वात्मकता प्रतिपादिता विद्यते। मरुत्गणानामुत्पत्तिविषयकं विवरणं प्रस्तुतं तथा भगवत: काश्यपस्य वंश: समुपवर्णितो वर्तते। सर्वत्र श्रीविष्णो: विभूतय: सर्वरूपेण प्रतिभाति। पशुमानवस्थावरजङ्गमादिषु सर्वेषु विष्णो: सत्ताया: प्रतिपादनं दृश्यते। श्रीविष्णो: दिव्यानि आभूषणानि प्रतिपादितानि। शङ्खचक्रगदादीनां वर्णनम् अध्यायस्यास्य महन्महत्त्वं प्रकाशयति। भक्तप्रियस्य विष्णो: स्मरणरूपफलं तथा भक्तानां प्रति आवेगस्य चित्रणमेतादृशरूपेण वर्णितमस्ति यत् सर्वेषां वैष्णवानां परमप्रियं सात्त्विकपुराणरूपेण इदं महापुराणं प्रचकास्ति।

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः –

१. हिरण्यकशिपोः प्रह्लादाय प्रश्न।

२. प्रह्लादस्य भगवत् गुणवर्णनम्।

३. प्रह्लादस्य पुत्राः ।

### विश्लेषणात्मकाः प्रश्नाः –

१. मरुताम् उत्पत्तिः कथमभूत वर्णयत ।

२. कश्यपवंशस्य परिचयं लिखत ।

३. जगतः व्यवस्थावर्णनं स्पष्टयत।

### निबन्धात्मकाः प्रश्नाः –

१. प्रह्लादकृतभगवत् गुणकीर्तनं विशदयत ।

२. भगवतः श्रीविष्णोः दिव्यविभूतयः लिखत ।

### एकाङ्कप्रश्नाः –

१. मरुतां पिता कः ?

२. कः प्रह्लादं नीतिशास्त्रं शिक्षयामास ?

३. कश्यपस्य पत्नी का ?

४. कति मरुतः आसन् ?

५. कश्यपः कस्य पुत्रः ?

६. कश्यपः कस्यै वरं ददौ ?

७. इन्द्रः कं सप्तधा चकार ?

८. प्रह्लादस्य पुत्रः कः ?

९. संह्लादस्य के पुत्राः आसन् ?

१०. ताम्रायाः कति कन्याः बभूवुः ?

११. शर्मिष्ठा कस्य पुत्री ?

१२. कस्मिन् मन्वन्तरे कश्यपस्य एते सर्वे पुत्रपौत्रादय: बभूव ?

१३. वनस्पतीनां राजा क: ?

१४. जलस्य राजा क: ?

१५. दक्षिणस्यां दिशि कं राजानमभ्यषेचयेत् ?

**उत्तराणि –**

१. कश्यप: २. शुक्राचार्य: ३ दिति: ४. ४९ ५. मरीचे: ६. दित्यै

७. दिते: गर्भं ८. विरोचन: ९. त्रय: १०. ६ ११. वृषपर्वण: १२. स्वारोचिषे

१३. प्लक्ष: १४. वरुण: १५. शङ्खप्रदं